दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णामावस्या
भाद्रपद 26 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-13 ■ वर्ष-5 ■ अङ्क-322 | 1 | सितम्बर 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 अष्टादशतमस्य ब्रिक्स-शिखरसम्मेलनस्य आयोजनम् नवदेहल्यां

4 नवदेहल्यां सञ्जातायाः राजनैतिक-सञ्चलनायाः अनन्तरं मन्त्रिमण्डलस्य उपवेशनं स्थगितम्; मन्त्रिणः शिमलां प्रत्यागताः

9 पद्मश्री पद्मा सचदेव राजकीय-महिला- महाविद्यालये, गांधीनगरम्, जम्मू इत्यत्र एकवर्षीय- संस्कृतप्रमाणपत्रीय-पाठ्यक्रमस्य शुभारम्भः




## पैरिस-नगरे अन्ताराष्ट्रिय-अन्तरिक्ष-सम्मेलनं सम्बोधितवान् प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्रिणा नरेन्द्रमोदिना उद्घोषितं यत् भारतम् अन्ताराष्ट्रिय-विधेः, संवादस्य, बहुपक्षीय-सहयोगस्य च आधारेण सुरक्षितस्य, शान्तिपूर्णस्य, शाश्वतस्य च अन्तरिक्ष-मण्डलस्य दृढं समर्थनं विधत्ते । सः अवोचत् यत् वैज्ञानिक तथ्यानि पारदर्शि-सत्यनिष्ठतया समग्र-लोककल्याणाय विनियुक्तानि भवेयुः। प्रधानमन्त्री फ्रान्स-देशस्य पैरिस-नगरे आयोजिते अन्ताराष्ट्रिय-अन्तरिक्ष-सम्मेलने आभासीय-माध्यमेन सम्बोधयन् एतत् प्रतिपादितवान्।

प्रधानमन्त्रिणा सबलं प्रोक्तं यत् अन्तरिक्ष-कक्षासु सम्मर्द्दवृद्ध्या सह सङ्घर्ष-स्थाने सहयोगः, अल्पकालिक-लाभानां स्थाने शाश्वतता, बहिष्करण-स्थाने च समावेशिता एव प्राथम्यं भजेरन्। श्रीमोदिना स्पष्टीकृतं यत् भारतस्य अन्तरिक्ष-यात्रा अस्यैव तत्त्वज्ञानस्य प्रतीकभूता वर्तते। शताब्देभ्यः अन्तरिक्षम् अस्माकं कल्पनां प्रेरयति स्म, अद्य च तत् जलवायु-सस्यादिभ्यः आरभ्य सागरान् जन-समुदायांश्च यावत् पृथिव्यां मानव जीवनं परिष्करोति ।

वैज्ञानिक-तथ्यानाम् उपयोगे पारदर्शितायाः सत्यनिष्ठायाश्च आवश्यकतामपि प्राधान्येन प्रास्तौत् प्रधानमन्त्री ।

भारतस्य अन्तरिक्ष-उपलब्धीः प्रतिपादयन् प्रधानमन्त्री अवोचत् यत् चन्द्रयान-तृतीयाभियानेन भारतं चन्द्रस्य दक्षिण-ध्रुव-समीपे अवतरणं कुर्वाणं विश्वस्य प्रथमं राष्ट्रम् अभवत्, आदित्य-एल्-प्रथमाभियानं च सूर्यस्य रहस्यानि उद्घाटयति। गतवर्षे एकः भारतीयः अन्ताराष्ट्रिय-अन्तरिक्ष-स्थानकं गतवान्। सः अग्रे अवोचत् यत् भारतस्य लक्ष्यं पञ्चत्रिंशदुत्तर-द्विसहस्रवर्षं यावत् भारतीय-अन्तरिक्ष-स्थानकस्य प्रतिष्ठापनं, चत्वारिंशदुत्तर-द्विसहस्रतमवर्षं यावच्च चन्द्रमसि भारतीयस्य प्रेषणमिति वर्तते । अस्य लाभश्च समग्रां मानवजातिं प्राप्नुयात् इति भारतस्य मार्गदर्शक-सिद्धान्तः। इसरो-संस्थायाः भूमिकां प्रशंसन् प्रधानमन्त्री अवोचत् यत् स्वकीयया कार्य-दक्षतया मितव्ययि-अभियानैश्च इसरो-संस्थया वैश्विक प्रशंसा अर्जिता। अस्याः तन्त्रज्ञानं कृषकाणां, धीवराणां, ऋतु-पूर्वानुमानस्य, आपद्प्रबन्धनस्य, नौवहनस्य च सेवां करोति, अद्यावधि-पर्यन्तं चतुस्त्रिंशत्-देशानां त्रिंशदधिक-चतुश्शतादधिकाः उपग्रहाः भारतीय-प्रक्षेपण-यानैः अन्तरिक्षं प्रेषिताः।

## पञ्जाबस्य भूतपूर्वमन्त्री भगत चुन्नी लालः जालन्धरे दिवङ्गताः

पञ्जाबस्य भूतपूर्वमन्त्री भारतीयजनतापक्षस्य वरिष्ठनेता च भगत चुन्नी लालः अद्य जालन्धरनगरे दीर्घकालिकरुग्णतायाः अनन्तरं दिवङ्गतः। सः चतुर्नवतिवर्षीयः (९४) आसीत्। भगत चुन्नी लालः २०१२ तमे वर्षे तत्कालीनशिरोमणि-अकाली-दल-भारतीयजनतापक्ष-सर्वकारे मन्त्रिमण्डलीयमन्त्री (कैबिनेट मन्त्री) आसीत्। सः जालन्धर-पश्चिम-विधानसभाक्षेत्रात् त्रिवारं विधायकत्वेन निर्वाचितः अभवत् तथा पञ्जाबविधानसभायाः उपाध्यक्षरूपेण अपि कार्यम् अकरोत्। तस्य पुत्रः मोहिन्दर भगतः सम्प्रति आम-आदमी-पक्षस्य सर्वकारे मन्त्री अस्ति।

## अद्यतनीयं सुभाषितम्

**स्वाभाविकं तु यन्मित्रं भाग्यैनैवाऽभिजायते।**
**तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति॥**

अर्थात्- ऐसा व्यक्ति जो स्वभाव से ही तुम्हारा परम मित्र हो बड़े भाग्य से मिलता है क्यों कि उसकी तुम्हारे प्रति मित्रता और प्रेम कृत्रिम नहीं होते और विपत्ति और बुरे समय में भी वह अपनी मित्रता को नहीं त्यागता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



## शिखर-सम्मेलनस्य सुरक्षा-व्यवस्थायाः सुदृढीकरणार्थं राष्ट्रिय-राजधान्यां सोमवासरं यावत् ड्रोन्स इत्येतेषां अथ च अन्येषां लघु-वायव्य-मञ्चानां सञ्चालने पूर्ण-प्रतिबन्धः - दिल्ली-आरक्षि-आयुक्तः अनुराग-कुमारः

शनिवासरात् आरभ्यमाणस्य द्विदिवसीयस्य ब्रिक्स शिखर सम्मेलनस्य पूर्व-सिद्धतायाः अङ्गत्वेन, सुरक्षा-चिन्तां वीक्ष्य, दिल्ली-आरक्षि-दलेन राष्ट्रिय-राजधान्यां सोमवासरं यावत् ड्रोन्स इत्येतेषां अथ च अन्येषां लघु-वायव्य-मञ्चानां सञ्चालने पूर्ण-प्रतिबन्धः स्थापितः। दिल्ली-आरक्षि-आयुक्तः अनुराग-कुमारः शिखर सम्मेलनस्य सुरक्षा-व्यवस्थायाः सुदृढीकरणार्थम् एतं निषेधादेशं प्रख्यापितवान्। आरक्षि-दलेन स्पष्टीकृतं यत् गुप्त सूचनाधारेण एषः निर्णयः गृहीतः। गुप्तसूचनानुसारं समाज-कण्टकाः आतङ्कवादि-समूहाः वा अवसरेऽस्मिन् जन-सुरक्षायाः, अतिविशिष्ट-व्यक्तीनां, महत्त्वपूर्ण-सर्वकारीय-प्रतिष्ठानानां च कृते सङ्कटम् उत्पादयितुम् एतादृशानां व्योम-मञ्चानां दुरुपयोगं कर्तुं शक्नुवन्ति ।



## नवदेहल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः लोक-हितैषिणा प्रिन्स-रहीम-आगा-खान-पञ्चमेन सह सञ्जाता मन्त्रणा।

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां विश्रुतेन इस्माइली-समुदायस्य पञ्चाशत्तमेन इमाम-प्रिन्स-रहीम-आगा-खान-पञ्चमेन सह सौहार्दपूर्णां मन्त्रणां अकरोत्। सामाजिक-सञ्चार-पटलीय-सन्देशे प्रधानमन्त्रिणा मोदिना दिवङ्गतः आगा-खान-चतुर्थः विकास-क्षेत्रे तस्य चिरस्थायि-योगदानं सस्नेहं संस्मृतम्। प्रधानमन्त्रिणा निरुपितं यत् ताभ्यां स्वास्थ्य रक्षायां, कृषौ, ग्रामीणाभिवृद्धौ, अथ च युव-महिला सशक्तीकरणे आगा-खान-विकास-तन्त्रेण सह भारतस्य सहभागितां सुदृढीकर्तुं सम्भाव्य-उपायेषु चर्चा विहिता। अपरत्र, विदेशमन्त्री डॉ. एस. जयशङ्करोऽपि प्रख्यातं लोक-हितैषिणं अमिलत्। प्रिन्स-रहीम-आगा-खान-पञ्चमः अस्य मासस्य पञ्चदश-दिनाङ्क यावत् भारत-यात्रायां स्थास्यति।



## विश्व-स्वास्थ्य-सङ्गठनस्य महानिदेशकः मातृ-शिशु-कल्याण-क्षेत्रे अथ असंचारी रोगाणां नियन्त्रणे भारतस्य अभूतपूर्व-स्वास्थ्योपलब्धीः भूरिशः प्राशंसयत्

विश्व-स्वास्थ्य-सङ्गठनस्य महानिदेशकः डॉ. टेड्रोस्-अधनोम-घेब्रेसस इत्यसौ केन्द्रीय-स्वास्थ्य-मन्त्रिणं जे.पी. नड्डा-महोदयम् अमिलत् । एतत् मेलनम् तैमोर-लेस्ते-देशे आयोजितायाः विश्व-स्वास्थ्य-सङ्गठनस्य दक्षिण-पूर्व-एशिया-क्षेत्रीय-समित्याः एकोनाशीतितम-सत्रावसरे सञ्जातम्। अवसरेऽस्मिन् डॉ. टेड्रोस इत्यमुना स्वास्थ्य-क्षेत्रे विशेषतः मातृ-शिशु-कल्याण-दिशि, अथ च असंचारी-रोगाणां विरुद्धं सञ्चालिते अभियाने भारतस्य उल्लेखनीय उपलब्धीनां कृते श्रीनड्डाय अभिनन्दनानि व्याहृतानि । डब्ल्यू.एच.ओ. प्रमुखेण निरुपितं यत् भारते षष्टिसहस्राधिकैकलक्ष-सङ्ख्यकैः आयुष्मान्-आरोग्य-मन्दिरैः जन-सामान्यस्य समीपं उच्च-रक्तचापस्य, मधुमेहस्य, सामान्य-कर्करोगाणां च प्रारम्भिक परीक्षणानां व्यवस्था प्रापिता, सहैव अग्रिम-उपचारार्थं सुगम-प्रेषण-मार्गाः कल्पिताः सन्ति।

## मलेशिया-तैमोर-लेस्ते-म्यानमार-देशानां स्व-समकक्षैः सह उच्च-स्तरीयोपवेशनम् अकरोत् केन्द्रीय-कृषि-कृषक-कल्याणमन्त्री

केन्द्रीय-कृषि-कृषक-कल्याणमन्त्री शिवराजसिंह चौहानः मलेशिया-तैमोर-लेस्ते-म्यानमार-देशानां स्व-समकक्षैः सह उच्च-स्तरीयोपवेशनम् अकरोत्। एताः मन्त्रणाः नवदेहल्यां समनुष्ठितायाः कृषि-वानिकी-विषयिण्याः नवम-आसियान-भारत-मन्त्रि-स्तरीय-सङ्गोष्ठ्याः अवसरे सम्पन्नाः। मलेशिया-देशस्य कृषि-खाद्य सुरक्षा-मन्त्रिणा मोहम्मद-बिन-साबू इत्यनेन सह सम्भाषणे श्रीचौहानेन ज्ञानस्य, कार्य-दक्षतायाः, उत्कृष्ट पद्धतीनां च परस्पर-आदान-प्रदानस्य महत्त्वं प्रतिपादितम्। केन्द्रीय-मन्त्रिणा संयुक्त-कृषि अनुसन्धाने, तन्त्रज्ञाने, नवीनोन्मेषे च सहयोगं दृढीकर्तुं रुचिः प्रदर्शिता। अपरत्र, श्रीचौहानः म्यानमार देशस्य कृषि-मन्त्रिणा मिन-नाउंग इत्यमुना सहापि विचार-विनिमयमकरोत्।



मेलनेऽस्मिन् केन्द्रीय-मन्त्रिणा निरुपितं यत् उभयोः देशयोः मध्ये कृषौ तत्सम्बद्ध-क्षेत्रेषु च सहकार्य-संवर्धनाय प्रस्तूयमानं सहमति-पत्रं अन्तिम-रूप-स्वीकरणस्य प्रौढ-चरणे वर्तते।




## अष्टादशतमस्य ब्रिक्स-शिखरसम्मेलनस्य आयोजनम् नवदेहल्यां

भारतम् अस्मात् शनिवारवासरात् नवदेहल्याः 'भारत मण्डपम्' इत्यत्र अष्टादशस्य ब्रिक्स-शिखरसम्मेलनस्य आतिथ्यं करिष्यति। द्विदिशात्मके अस्मिन् शिखरसम्मेलने ब्राजील, चीन, मिस्र, इथियोपिया, इण्डोनेशिया, भारतम्, ईरान, रूस, सऊदी अरब, दक्षिण अफ्रीका, संयुक्त अरब अमीरात च इत्यादयः एकादश प्रमुखाः विकसनशीलाः अर्थव्यवस्थाः सम्मिलिताः भविष्यन्ति। बेलारूस, बोलिविया, क्यूबा, कजाकिस्तान, मलेशिया, नाइजीरिया, थाइलैण्ड, युगाण्डा, उज्बेकिस्तान, वियतनाम च देशाः ब्रिक्स-सहभागिदेशरूपेण भागं ग्रहीष्यन्ति। ब्रिक्स-समूहस्य देशाः विश्वस्य प्रायः नवचत्वारिंशत् प्रतिशतं (४९%) जनसङ्ख्यायाः प्रायः चत्वारिंशत् प्रतिशतं (४०%) वैश्विक-सकल-घरेलू-उत्पादस्य (GDP) प्रतिनिधित्वं कुर्वन्ति।

अस्मिन् सम्मेलने रूस-राष्ट्रपतिः व्लादिमीर पुतिनः, चीन-राष्ट्रपतिः शी जिनपिङ्गः, दक्षिण-अफ्रीका-राष्ट्रपतिः सिरिल रामाफोसा, मिस्र-राष्ट्रपतिः अब्देल फतह अल-सीसी, इण्डोनेशिया-राष्ट्रपतिः प्राबोवो सुबियान्तो, ईरान-राष्ट्रपतिः मसूद पेजेश्कियान, अबुधाबी-देशस्य युवराजः शेख खालिद बिन मोहम्मद बिन जायद अल नाहयान च सम्मिलिताः भविष्यन्ति। इथियोपिया-प्रधानमन्त्री अबी अहमद अली अपि सम्मेलने भागं ग्रहीष्यति। ब्राजील-देशस्य प्रतिनिधित्वं विदेशमन्त्री मौरो विएरा करिष्यति। सऊदी अरब-देशस्य विदेशमन्त्री राजकुमारः फैसल बिन फरहान अल सऊदः अपि अस्मिन् सम्मेलने भागं नेष्यति।

ब्रिक्स-शिखरसम्मेलनस्य आरम्भः शनौ सदस्यदेशेभ्यः 'समावेशी-वैश्विक-शासनस्य बहुपक्षवादस्य च सुदृढीकरणम्' इति विषये सत्रेण भविष्यति। ब्रिक्स-देशानां नेतारः 'भारत मण्डपम्' इत्यत्र 'भारत इनोवेट्स' (Bharat Innovates) प्रदर्शिनीम् अपि द्रक्ष्यन्ति। तदनन्तरं संयुक्तरूपेण वृक्षारोपणकार्यक्रमः भविष्यति, नेतारः प्रधानमन्त्रिणा मोदिना आयोजिते रात्रिभोजे सम्मिलिताः च भविष्यन्ति। प्रधानमन्त्री शिखरसम्मेलनात् पृथक् ब्रिक्स-नेतृभिः सह अनेकाः द्विपक्षीयवार्ताः अपि कर्तुं शक्नोति।

रविवासरे प्रधानमन्त्री मोदी ब्रिक्स-सहभागिदेशानाम् आमन्त्रितदेशानां च नेतृणां स्वागतं करिष्यति। तदनन्तरं 'स्थैर्यम्, नवोन्मेषः, सहयोगः सततविकासश्च—समावेशी-वैश्विक-विकासाय भविष्यस्य निर्माणम्' इति विषये सत्रम् आयोजयिष्यते। ब्रिक्स-शिखरसम्मेलनस्य कृते नवदेहल्यां सज्जाः तीव्रगत्या प्रचलन्ति।



## भारतेन महिला-कनिष्ठ-एशिया-चषक-हॉकी-स्पर्धायाः उपान्त्यचक्रे स्थानं प्राप्तम्

भारतेन महिला-कनिष्ठ-एशिया-चषक-हॉकी-स्पर्धायाः उपान्त्यचक्रे (सेमीफाइनल-चक्रे) स्थानं सुनिश्चितं कृतम्। चीनदेशस्य मोकी-नगरे अद्य भारतेन पाकिस्तानदेशः पराजितः। भारतस्य पूजा मलिक-क्रीडकया 'हैट्रिक' (त्रिकन्दुक-लक्ष्यम्) कृतम्, यदा तु सनिका-चन्द्रकान्त-माने, मधु-सिदार, सुप्रिया तथा च रोशनी-ऐन्द इत्येताभिः द्वौ-द्वौ गोलौ (कन्दुकलक्ष्यौ) कृतौ। भारतं द्वादशे (१२) सितम्बर-दिनाङ्के उपान्त्यचक्रे दक्षिणकोरिया-मलेशिया-देशयोः मध्ये प्रवृत्तस्य द्वन्द्वस्य विजयिना सह क्रीडिष्यति।




# क्रीडावार्ता- बाङ्ग्लादेशं पराजित्य भारतं महिला-एशिया-चषकस्य अन्तिमचक्रे प्रविष्टम्

हिमसंस्कृतवार्ता दुबई ।
हरमनप्रीतकौरस्य नेतृत्वे भारतीय-महिला-क्रिकेट-दलेन महिला-एशिया-चषकस्य अन्तिमचक्रे (फाइनल) स्थानं सुरक्षितं कृतम्। उपात्यचक्रे (सेमीफाइनल) भारतेन बाङ्गलादेशः ४० धावनाङ्कैः पराजितः, एतेन सह भारतीयदलं दशमवारं स्पर्धायां प्रविष्टम्।
प्रथमे पर्याये भारतदलेन निर्धारित-विंशति-षटकात्मके (२० ओवरेषु) षड्-स्तोभानां-हान्या १४९ धावनाङ्काः अर्जिताः। प्रत्युत्तरे बाङ्गलादेशस्य दलं विंशति-षटकेषु सप्तस्तोभ-हान्या १०९ धावनाङ्कान् एव प्राप्तुम् अशक्नोत्। अस्मिन् द्वन्द्वे भारतस्य कृते शेफाली वर्मया कन्दुकप्रहारेण उत्कृष्टं प्रदर्शनं कृतम्, दीप्तिशर्मा द्वारा च कन्दुकक्षेपणे स्वस्य प्रतिभा प्रदर्शिता। अन्तिमचक्रे भारतस्य सामना श्रीलङ्का-पाकिस्तान-देशयोः मध्ये भविष्यमाणायाः अन्य-उपात्य-स्पर्धायाः विजेतृदलेन सह भविष्यति। लक्ष्यस्य अनुसरणं कुर्वता बाङ्गलादेशदलेन समीचीनः आरम्भः कृतः आसीत्, किन्तु दीप्तिशर्मणः नेतृत्वे भारतीय-कन्दुकक्षेपिकाभिः पुनः प्रत्यवगाहनं कृत्वा विजयः अर्जितः। बाङ्गलादेशस्य कृते शोर्ना अख्तरः २२ धावनाङ्कैः अपराजिता अभवत्। अपरपक्षे दिलारा अख्तरः २१, निगार सुल्ताना १९, शोभना मोस्तारी १८, जुआरिया फेरदोसः १४, फाहिमा खातूनः १४, शर्मिन अख्तरः च १ धावनाङ्कं प्राप्तवन्तः। भारतस्य पक्षतः दीप्तिशर्मया त्रयस्तोभानि प्राप्तानि, यदा तु नन्दिनीशर्मया द्वे स्तोभे गृहीतौ। तथैव श्रीचरणी प्रेमा रावतः च प्रत्येकम् एकैकं सफलतां प्राप्तवत्यौ।

# षड्विंशति-वर्षेभ्यः परं शिमला-जिला-परिषदः उपरि

## भाजपादलस्य अधिकारः; सिसोदिया अध्यक्षः, कालान्टा च उपाध्यक्षः



हिमसंस्कृतवार्ताः- शिमला।
शिमलाजिलापरिषदः अध्यक्ष-उपाध्यक्षपदयोः उपरि षड्विंशति-वर्षेभ्यः (२६) परं भारतीय-जनतापक्षेण (भाजपा) स्व- अधिकारः स्थापितः। गुरुवासरे सम्पन्ने निर्वाचने भाजपादलस्य चन्दलोग-नेरुवा-वार्डतः निर्वाचितः भूपेन्द्रसिंहसिसोदियाः जिलापरिषदः अध्यक्षत्वेन चितः, तत्रैव टिक्करवार्डतः निर्वाचितः भरतसिंहकालान्टा उपाध्यक्षपदे विजयं प्राप्तवान्। अध्यक्षपदस्य निर्वाचने भूपेन्द्रसिंहसिसोदिया-महोदयाय त्रयोदश (१३) मतानि प्राप्तानि, यत्रैव उपाध्यक्षपदाय भरतसिंहकालान्टा-महोदयः चतुर्दश (१४) सदस्यानां समर्थनम् अलभत्। जिलापरिषदि भाजपा-पक्षस्य उभयोः प्रत्याशिनोः विजयः दलस्य कृते महती राजनैतिकी उपलब्धिः मन्यते। षड्विंशतिवर्षाणां दीर्घात् अन्तरालात् परं जिलापरिषदः शीर्षस्थे उभे पदे भाजपा-दलस्य अङ्के आगते। निर्वाचन-परिणामे प्रकाशिते सति भाजपासमर्थकेषु हर्षोल्लासस्य वातावरणम् अभवत्। भूपेन्द्रसिंहसिसोदिया-महोदयस्य अध्यक्षत्वेन, भरतसिंहकालान्टा-महोदयस्य उपाध्यक्षत्वेन निर्वाचनेन सहैव जाला-परिषदि भाजपादलस्य प्रभावः स्पष्टतया दृश्यते।
उभाभ्यां नवनिर्वाचिताभ्यां पदाधिकारिभ्यां समर्थनदातृभ्यः जिलापरिषदः सदस्येभ्यः कृतज्ञता ज्ञापिता, परिषदः विकासकार्याणां प्राथम्यप्रदानस्य विषये च प्रतिज्ञा कृता।

# लम्बित-महार्घता-वृत्तेः अवशिष्ट-राशेः च विषये आगतः हिमाचल-उच्च-न्यायालयस्य निर्णयः




हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेश-उच्चन्यायालयेन राज्य-सर्वकारस्य कर्मचारिणां पक्षतः १ जुलाई २०२२ दिनाङ्कात् लम्बितानां महार्घतावृत्तेः पञ्च-अंशानां तस्य अवशिष्टराशेः च शोधनम् अधिकृत्य प्रविष्टानां याचिकानां निस्तारणं कुर्वता सम्बद्ध-विभागेभ्यः षट्सप्ताहमध्ये निर्णयस्वीकरणाय निर्देशाः दत्ताः। न्यायमूर्तेः ज्योत्स्ना- रिवाल दुआ महोदयायाः एकलपीठेन प्रकरणस्य श्रवणं कुर्वत्या उक्तं यत् याचिकाकर्तॄणां पक्षतः १८ मई २०२६ दिनाङ्के प्रस्तुतं प्रतिवेदनं सम्बद्धविभागेषु लम्बितम् अस्ति। उच्चन्यायालयेन प्रतिवादिभ्यः (सर्वकाराय) निर्देशः प्रदत्तः यत् एतेषु प्रतिवेदनेषु २ मार्च २०२४, १६ अक्तूबर २०२४, १५ अक्तूबर २०२५ दिनाङ्केषु प्रसारितानां कार्यालय-ज्ञापनानां दृष्ट्या विध्यनुसारं निर्णयः स्वीकर्तव्यः। याचिकाकर्तॄणां तर्कः आसीत् यत् एतेषाम् आदेशानाम् अन्तर्गतं १ जुलाई २०२२ तः देय-महार्घतावृत्तेः अंशानां लाभः तैः प्राप्तव्यः आसीत्, किन्तु तस्य अवशिष्टराशिः अद्यापि न वितरिता। तैः पञ्च-लम्बित-अंशानां अवशिष्टराशेः प्रसारणस्य याचना कृता।

## विभेदस्य (पक्षपातस्य) आरोपः

याचिकाकर्तृभिः राज्य-सर्वकारस्य १० अक्तूबर २०२४ तथा ३ फरवरी २०२६ दिनाङ्कयोः अधिसूचनायाः उल्लेखं कृत्वा विभेदस्य आरोपः अपि आरोपितः। तेषाम् अभिमतम् आसीत् यत् राज्यसर्वकारस्य कर्मचारिणाम् एकस्मै विशिष्टवर्गाय देयतिथिभ्यः एव केन्द्रसर्वकारस्य दरैः महार्घतावृत्तिः प्रदत्ता।
उच्चन्यायालयेन स्पष्टीकृतं यत् तेन अस्य विषयस्य गुण-दोषान् अधिकृत्य कोऽपि अन्तिम-अभिप्रायः न प्रकटितः। न्यायालयेन सर्वकारः आदिष्टः यत् सः याचिकाकर्तॄणां प्रतिवेदनेषु षट्सप्ताह-मध्ये निर्णयं कुर्यात्, तस्य सूचनां च याचिकाकर्तृभ्यः दद्यात्। उच्चन्यायालयेन एतदपि स्पष्टीकृतं यत् यदि समीक्षणानन्तरं याचिकाकर्तृभ्यः १ जुलाई २०२२ तः महार्घतावृत्तिः, पञ्च- लम्बित- अंशानां अवशिष्टराशिः वस्तुतः देया सिद्ध्यति, तर्हि तस्याः शोधनम् अपि अस्यामेव षट्सप्ताह-कालावधौ कर्तव्यम्।

# नवदेहल्यां सञ्जातायाः राजनैतिक-सञ्चलनायाः अनन्तरं मन्त्रिमण्डलस्य उपवेशनं स्थगितम्; मन्त्रिणः शिमलां प्रत्यागताः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य मन्त्रिमण्डले सम्भावित- महत्- परिवर्तनं परितः प्रचलन्त्याः राजनैतिकसञ्चलनायाः मध्ये शुक्रवासरे प्रस्ताविता राज्य-मन्त्रिमण्डलस्य सभा आगामि-आदेशान् यावत् स्थगिता वर्तते। इयं सभा मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू- महोदयस्य अध्यक्षतायां ११ सितम्बरदिनाङ्के प्रातः एकादशवादने राज्यसचिवालये प्रस्ताविता आसीत्। नवदेहल्यां स्थिता अर्धाधिका मन्त्रिमण्डलसदस्याः अधुना प्रतिनिवृत्ताः। अधिकांशाः मन्त्रिणः मन्त्रिमण्डलसभायां भागं ग्रहीतुं शिमलां प्रत्यागताः आसन्। उपमुख्यमन्त्री मुकेश अग्निहोत्री अपि ऊनामण्डलं प्रत्यागतः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अपि गुरुवासरे प्रातःकाले चण्डीगढ़तः शिमलां प्राप्तवान्।

## मन्त्रिणां राहुलगान्धी-महोदयेन सह न जाता वार्ता

नवदेहल्यां स्थितानां मन्त्रिणां लोकसभायाः विपक्षनेत्रा राहुलगान्धी-महोदयेन सह साक्षात्कारात्मकं मेलनं न सम्भूतम्। सूत्राणां वार्तानुसारं मन्त्रिणां योजना आसीत् यत् ते उच्च-नेतृत्व-नेतृभिः सह राहुलगान्धी-महोदयम् अपि मेलिष्यन्ति, किन्तु तस्य व्यस्ततायाः कारणात् मेलनस्य समयः न लब्धः। अस्मात् परम् अधिकांशाः नेतारः प्रतिनिवृत्ताः। नवदेहलीतः शिमलां प्राप्यैव शिक्षामन्त्री रोहितठाकुरः उद्योगमन्त्री हर्षवर्धन चौहानश्च शुक्रवासरे राज्यसचिवालये स्वकार्याणि सम्पादितवन्तौ। रोहितठाकुरः सचिवालये आयोजिते उच्च-शिक्षाविभागस्य एकस्मिन् कार्यक्रमे अपि उपस्थितः अभवत्।

## द्वयोः वर्तमानमन्त्रिवर्ययोः निवृत्तेः सम्भावनावार्ता

मन्त्रिमण्डले सम्भाव्यमान-परिवर्तनस्य विभागानां पुनराबंटनस्य च चर्चायाः मध्ये मन्त्रिणां देहलीप्रवासः महत्त्वपूर्णः मन्यते स्म। बहवः मन्त्रिणः उच्चनेतृत्वसमक्षं स्वकार्यविवरणं स्थापयित्वा स्थितिं स्पष्टीकर्तुं यत्नशीलाः आसन्। मन्त्रिणां दृष्टिः स्व-वर्तमान-विभागानां रक्षणे तथा च केषाञ्चित् मन्त्रिणां दृष्टिः अतिरिक्तानां विभागानां प्राप्तौ वर्तते। हिमाचल-मन्त्रिमण्डले साम्प्रतम् एकं पदं रिक्तम् अस्ति। मुख्यमन्त्री सुक्खूमहोदयः पूर्वमेव कुल्लूक्षेत्रस्य काङ्ग्रेसविधायकं सुन्दरसिंहठाकुरं मन्त्रिपदे नियोक्तुं सङ्केतं दत्तवान्। सहैव राजनैतिक-क्षेत्रेषु द्वयोः वर्तमान-मन्त्रिवर्ययोः निवृत्तेः अपि चर्चाः प्रचलन्ति। यदि एतत् भविष्यति, तर्हि मन्त्रिमण्डले त्रयाणां नूतन-मुखानां समावेशस्य सम्भावना उद्भवति।

## सत्ता-विरोधी-धारायाः आशङ्कायाः मध्ये मन्त्रिणां कार्येषु दृष्टिः

आगामि-विधानसभा-निर्वाचनं दृष्ट्वा काङ्ग्रेसदलस्य उच्चनेतृत्वं मन्त्रिणां कार्यशैलीं तेषां निर्वाचनक्षेत्राणां स्थितिं च समीक्षते। वीरभद्रसर्वकारस्य जयरामसर्वकारस्य च काले बहुभिः मन्त्रिभिः सत्ता-विरोधीधारायाः सम्मुखीकरणं कृतम्, पराजयश्च अनुभूतः। अतः मन्त्रिणां कार्यप्रदर्शने नेतृत्वस्य तीक्ष्णा दृष्टिः वर्तते। मुख्यमन्त्रीमहोदयः मन्त्रिणां कार्यवृत्तम् उच्चनेतृत्वस्य समक्षं पूर्वमेव उपस्थापितवान्, अधुना मन्त्रिणः अपि स्व-उपलब्धिभिः स्वस्थितिं दृढीकर्तुं प्रयासरताः सन्ति।

## मुकेश-अग्निहोत्री-सहिताः अनेके मन्त्रिणः देहल्याम् आसन्

उपमुख्यमन्त्री मुकेश अग्निहोत्री, धनीरामशाण्डिलः, चन्द्रकुमारः, रोहितठाकुरः, हर्षवर्धन चौहानः, विक्रमादित्यसिंहश्च गतेषु दिनेषु नवदेहल्याम् आसन्। काङ्ग्रेस-प्रदेशाध्यक्षः विनयकुमारः अपि देहल्याम् आसीत्। साम्प्रतम् अधिकांशाः नेतारः शिमलां प्रत्यागताः।



हिमसंस्कृतवार्ताः, ईदरधीरजः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य बहु-विचित्राः वार्ताः अस्माभिः श्रुताः।

प्रथमं तु असमराज्ये एकेन अधिकारिणा मुख्यमन्त्रिणः ध्वनि-अनुकर्ता नियुक्तः। तेन जनाः वञ्चिताः।

नन्दिनी- अहो आश्चर्यम्! अधिकारिणा मन्त्रिणः ध्वनिः एव चोरितः!

द्वितीया वार्ता अमेरिकादेशात् प्राप्ता। तत्र एकया भारतीय-महिलया निज-भ्रातुः यानं दृष्टम्। यानस्य सर्वाणि चत्वारि चक्राणि कैश्चित् चौरैः चोरितानि।

काव्या- हाहा! अमेरिकादेशे अपि ईदृशी दशा जाता!

अपरा वार्ता फ्लोरिडाक्षेत्रे घटिता। तत्र आपणस्य प्राङ्गणे द्वाभ्यां नराभ्यां युद्धं कृतम्। एकेन परशुः गृहीतः, अन्येन च तीक्ष्ण-खड्गः धृतः।

नन्दिनी- महाभयङ्करम्! क्षुद्र-कारणेन शस्त्र-युद्धम् आरब्धम्।

अन्तिमा वार्ता ओडिशाराज्यात् आगता। तत्र एकेन शिल्पिना यानानां त्यक्तलोहखण्डैः विशालाः यन्त्रघट्यः निर्मिताः।

काव्या- अतीव सुन्दरम्! अवकरेण अपि कला सृष्टा! अद्यतन्यः वार्ताः समाप्ताः।




## HP CBSE SCHOOL DRESS- शिक्षकाः नीलवर्णस्य ऊरुक-युतकं, शिक्षिकाः नीललोहितवर्णस्य परिधानं धरिष्यन्ति; छात्रेभ्यः हरितवर्णः निर्धारितः

हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्रिणः ठाकुर-सुखविन्दरसिंहसुक्खू- महोदयस्य अध्यक्षतायां गुरुवासरे शिक्षा-विभागस्य एका मन्त्रणासभा आयोजिता, यस्यां सीबीएसई विद्यालयानां शिक्षकेभ्यः गणवेष-संहिता, छात्राणां गणवेषः, विद्यालयभवनानां कृते वर्णयोजनाम् अन्तिमरूपं दातुं विस्तृता चर्चा कृता।

उपवेशने निर्णयः स्वीकृतः यत् सीबीएसई-विद्यालयानां छात्राणां विशिष्टगणवेषः हरित-वर्ण-आधारितः भविष्यति। एतेषां विद्यालयानां महिलाशिक्षिकाः मन्द-नीललोहित-वर्णस्य वेशं धरिष्यन्ति, यत्रैव पुरुषशिक्षकाः मन्द-नीलवर्णस्य ऊरुकं युतकं च परिधास्यन्ति।

## हरित-सिकतावर्णैः रञ्जयिष्यन्ते विद्यालयाः

एतेषां विद्यालयानां भवनानि 'ऑलिव-ग्रीन' (जैतून-हरित) तथा 'सैण्ड-बेज' (वालुका- श्वेत-पीत) वर्णैः रञ्जितानि भविष्यन्ति। शिक्षकाणां परिधानं स्वच्छं, औपचारिकं, शालीनं, वृत्तिमत् च स्यात्, तस्मिन् नूनातिन्यूनं बाह्य-साधनानाम् उपयोगः करणीयः। कर्त्तव्य-काले शिक्षकेभ्यः स्व-परिचयपत्रस्य धारणम् अपि अनिवार्यं विहितम्। मुख्यमन्त्री प्रोक्तवान् यत् राज्यसर्वकारः छात्रेभ्यः तेषां गृहाणां निकटे एव गुणवत्तोपेताः शैक्षणिकसुविधाः प्रदातुं कटिबद्धः वर्तते। राज्यसर्वकारेण सीबीएसई- विद्यालयेषु आवश्यक- आधारभूत- संरचनायाः विकासाय, छात्रेभ्यः शिक्षकेभ्यश्च सुविधानां सुदृढीकरणाय अशीति- कोटि- रूप्यकाणां (८० कोटि) राशिः मुक्ता कृता। सः अवदत् यत् एतेभ्यः विद्यालयेभ्यः अतिरिक्ताणां पञ्च-कोटि-रूप्यकाणां (५ कोटि) राशिः अपि शीघ्रमेव प्रदास्यते।

अस्मिन् उपवेशने विधायकाः सुरेशकुमारः, चन्द्रशेखरः, नीरज नैय्यरः, हिमाचलप्रदेश-निजी- शिक्षण- संस्थान- विनियामक-आयोगस्य सदस्यः विजयपालसिंहः, शिक्षासचिवः राकेशकंवरः, विद्यालय-शिक्षा-निदेशकः आशीषकोहली तथा च अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्।

# अष्टादशतमं ब्रिक्सशिखरसम्मेलनम्
## नवदिल्लीनगरं विश्वकूटनीतेः केन्द्रं भविष्यति




**नवदिल्ली/भागलपुर १० सितम्बर २०२६। हिमसंस्कृतवार्ताः- डॉ विमलेश झा**

भारतराष्ट्रं अष्टादशतमस्य ब्रिक्सशिखरसम्मेलनस्य आयोजनाय पूर्णतया सज्जितमस्ति। सम्मेलनस्य मुख्यकार्यक्रमः १२ तथा १३ सितम्बर २०२६ दिनाङ्कयोः नवदिल्लीस्थिते भारतमण्डपे आयोजयिष्यते। अस्मिन् महत्त्वपूर्णे अन्तर्राष्ट्रीयसम्मेलने ब्रिक्ससदस्यदेशानां राष्ट्राध्यक्षाः तथा उच्चस्तरीयानि प्रतिनिधिमण्डलानि भागं ग्रहीष्यन्ति।प्रधानमन्त्री श्रीनरेन्द्रमोदीमहोदयेन सामाजिकमाध्यमेषु ब्रिक्सशिखरसम्मेलनस्य सज्जतायाः दृश्यं प्रदर्शितम्। तेन स्वसन्देशे "ब्रिक्सशिखर 2026सम्मेलनाय सर्वं सिद्धम् अस्ति !" इति उक्त्वा भारतं अष्टादशतमस्य ब्रिक्सशिखरसम्मेलनस्य आतिथ्यं कर्तुं सज्जमिति सूचितम्।भारतस्य आतिथ्ये आयोजितस्य अस्य शिखरसम्मेलनस्य मुख्यविषयः अस्ति— प्रत्यास्थतायाः, नवोन्मेषस्य, सहयोगस्य तथा स्थायित्वस्य निर्माणम्।"(Building for Resilience, Innovation, Cooperation and Sustainability") सम्मेलनस्य माध्यमेन सदस्यदेशाः वैश्विकसहयोगं, आर्थिकविकासं, नवोन्मेषं, स्थायित्वं तथा सामूहिकसुरक्षां प्रति विचारविनिमयं करिष्यन्ति।ब्रिक्सशिखरसम्मेलनं दृष्ट्वा राजधानीदिल्लीनगरे व्यापकाः सुरक्षाव्यवस्थाः कृताः सन्ति। दिल्ली-आरक्षीविभागस्य सूचनानुसारं प्रायः १५,००० दिल्ली-आरक्षीकर्मचारिणः तथा प्रायः २०० अर्धसैनिकबलानां वाहिन्यःसुरक्षाव्यवस्थायां नियोजिताः सन्ति। सुरक्षाव्यवस्थायां प्रवेशनियन्त्रणम्, परिचयपरीक्षणम्, सततं निरीक्षणम्, गुप्तचरसूचनानां आधारेण त्वरिता प्रक्रिया तथा आपत्कालीनप्रतिक्रियाव्यवस्था इत्यादीनि प्रमुखानि अङ्गानि सन्ति। विमानस्थानकात् भारत-मण्डपपर्यन्तं विशेषनिरीक्षणस्य व्यवस्था कृता वर्तते। विदेशीयातिथीनां सुरक्षां दृष्ट्वा विमानस्थानके, अतिथीनां निवासस्थलेषु, भारतमण्डपे तथा अन्येषु सम्भावितेषु सभास्थलेषु विशेषाः सुरक्षाव्यवस्थाः कृताः सन्ति। विशिष्टातिथीनां आवागमनमार्गेषु अपि कठोरं निरीक्षणं भविष्यति। विभिन्नेषु स्थलेषु विशेष-्कैमरायन्त्राणि स्थापितानि सन्ति तथा सम्भावितानां मार्गाणां पूर्वमेव परीक्षणं कृतम् अस्ति। अस्मिन् सम्मेलने विश्वस्य दृष्टिः नवदिल्ली प्रति भविष्यति। १२ तथा १३ सितम्बरदिनाङ्कयोः अष्टादशतमस्य ब्रिक्स्-शिखर-सम्मेलनस्य कारणेन नवदिल्ली वैश्विक-कूटनीतेः प्रमुखं केन्द्रं भविष्यति। भारतं विश्वस्य प्रमुखानां राष्ट्राणां नेतृणां स्वागताय पूर्णतया सिद्धमस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रदर्शिता सम्मेलनस्य सज्जतायाः दृश्यं भारतस्य आतिथ्यसामर्थ्यस्य तथा वैश्विकमञ्चे भारतस्य वर्धमानस्य प्रभावस्य परिचायकः अस्ति।



# अमेरिकादेशे कर्मच्युतानां विदेशीयानां कृते नूतनप्रस्तावः" तात्कालिक-देशत्यागस्य निर्देशः"

**हिमसंस्कृतवार्ताः डॉ विमलेश झा वाशिंगटन डीसी/**

संयुक्तराज्य-अमेरिकायाः राष्ट्रपतिना डोनाल्ड ट्रम्प प्रशासनेन गृहसुरक्षाविभागस्य माध्यमेन वीज़ाधारकाणां कृते एकस्य नूतनस्य अतीव कठोरनियमस्य प्रारूपं प्रस्तुतं कृतम्, यस्य मुख्यनिर्देशानुसारं यदि कश्चन एच-१बी वीज़ाधारकः अथवा अन्य-अस्थायीवीज़ाधारकः कर्मकरः कस्यापि कारणात् स्वसेवां त्यजति वा कर्मच्युतः क्रियते, तर्हि सः पूर्वप्रदत्तं समयं विना सद्यः एव अमेरिकादेशं परित्यज्य स्वदेशं प्रतिनिवर्तेत। अनेन प्रस्तावेन वर्षे २०१७ तः प्रचलितः ६० दिनानां वर्तमान-अनुग्रहकालः (Grace Period) पूर्णतया समाप्तः भविष्यति, यस्मिन् षष्टिदिनात्मके अवधौ कर्मकराः न केवलं नूतनकार्यस्य नूतनप्रायोजकस्य (Sponsor) वा अन्वेषणं कर्तुं समर्थाः भवन्ति स्म, अपि तु आवासस्थानस्य निष्कासनं विक्रयणं वा, सन्ततीनां विद्यालयपरिवर्तनं, तथा च अन्यानि पारिव्यावहारिककार्याणि सुगमतया समापयन्ति स्म। यतः १९९० तमे वर्षे आरब्धस्य एच-१बी वीज़ाकार्यक्रमस्य प्रमुखोद्देश्यं भारत-चीनदेशाभ्यां प्रतिभावतां युवान् समाहूय देशस्य आर्थिकप्रगतेः सम्पोषणम् आसीत्, अधुना च अमेरिकायाः दिग्गजाः तान्त्रिकसंस्थाः (Tech Companies) बहुशः भारतीयकुशलकर्मकरेषु एव आश्रिताः वर्तन्ते, अतः अस्य निर्णयस्य सर्वाधिकः प्रत्यक्षः दारुणश्च प्रभावः भारतीयाभियन्तृषु भारतीयोद्योगेषु च भविष्यति। यद्यपि २०२५ तमे वर्षे सत्तां प्राप्तवता ट्रम्पप्रशासनेन प्रवासीनां विषये नैरन्तर्येण कठोरता प्रदर्शिता अस्ति, तथा च गृहसुरक्षाविभागेन स्वीकृतं यत् अनेन परिवर्तनेन प्रारम्भे प्रौद्योगिकीप्रतिष्ठानानां कृते काठिन्यं सम्भाव्यते, तथापि तेषां दृढविश्वासः अस्ति यत् अन्ते एतानि सर्वाणि पदानि स्थानीय-अमेरिकीनागरिकाणां कृते एव नूतनाजीविकायाः अवसराः दास्यन्ति परमत्र स्मर्तव्यं यत् अयं नियमः साम्प्रतं तावत् केवलं प्रस्तावितः वर्तते, न तु त्वरिततया विधिस्वरूपेण प्रवर्तितः, यतः अस्य अन्तिमादेशस्य विधिकरूपेण प्रख्यापनात् पूर्वं मासद्वयं यावत् जनसामान्यस्य, विदुषां, प्रौद्योगिकी-संस्थानां च मन्तव्यपरामर्शसङ्ग्रहः करिष्यते, तदनन्तरमेव अस्य सर्वसम्मतः अन्तिमनिर्णयः भविष्यति।

# शिक्षकेभ्यः मूकदर्शकः न, अधिकाराणां रक्षकः प्रतिनिधिः अपेक्ष्यते : डॉ. दिव्य-ज्योतिः

**पाटलिपुत्र-विधि-महाविद्यालये विज्ञान-महाविद्यालये च जनसुराज-प्रत्याशिन्या कृता शिक्षकैः सह प्रत्यक्ष-चर्चा वर्तमान-विधानपरिषद-सदस्यस्य (एमएलसी) कार्यशैलीं प्रति शिक्षकेषु तीव्रः आक्रोशः**



***पाटलिपुत्रम् (बिहारम्), १० सितम्बर २०२६ : हिमसंस्कृतवार्ताः राघव नाथ झा***

बिहार-विधानपरिषद-निर्वाचनस्य पृष्ठभूमिं दृष्ट्वा जनसुराज-दलस्य नेत्री तथा पाटलिपुत्र-शिक्षक-निर्वाचनक्षेत्रस्य प्रत्याशिनी डॉ. दिव्य-ज्योतिः अद्य पाटलिपुत्र-विधि-महाविद्यालयं विज्ञान-महाविद्यालयं च समेत्य बहुषु महाविद्यालयेषु गत्वा शिक्षकैः सह प्रत्यक्षं संवादम् अकरोत्। अस्मिन् अवसरे सा शिक्षकाणां समस्याभिः, अधिकारैः, स्वाभिमानेन च सम्बद्धान् विषयान् विस्तरेण अशृणोत्, तैः सह गम्भीरं विमर्शं च व्यधात्।भ्रमणक्रमे शिक्षकेषु वर्तमान-विधानपरिषद-सदस्यस्य (एमएलसी) कार्यप्रणालीं प्रति स्पष्टम् असंतोषः आक्रोशश्च परिलक्षितः। शिक्षकाः उक्तवन्तः यत् वर्षद्वयाधिककालात् तेषां बह्व्यः मौलिकाः समस्याः अद्यापि अनिर्णीताः सन्ति। अतः सम्प्रति तेभ्यः केवलं मौखिकम् आश्वासनं दातुं न, अपि तु तेषां न्यायार्थं निर्णायकं सङ्घर्षं कर्तुं समर्थः प्रतिनिधिः आवश्यकः अस्ति। संवाद-सभाम् उद्दिश्य डॉ. दिव्य-ज्योतिः अवदत् यत्—"शिक्षकेभ्यः स्वहितैषी प्रतिनिधिः आवश्यकः, न तु कश्चित् मूकदर्शकः। केवलम् आसन्दिकायां (कुर्सी) उपवेशनं न प्रतिनिधित्वं भवति। प्रतिनिधित्वस्य यथार्थः अर्थः अस्ति—शिक्षकाणां पार्श्वे दृढतया स्थित्वा शासनात् प्रश्नान् प्रष्टुं तेषां हिताय च सङ्घर्षं कर्तुम्।" सा अग्रे न्यवेदयत् यत् शिक्षक-समाजः सम्प्रति मिथ्या-प्रतिज्ञाभ्यः विरतः जातः, स्वप्रतिनिधेः च कृतानां कार्याणां विवरणम् अन्विच्छति। यदि समाजस्य प्रबुद्ध-वर्गः अद्यापि स्वमौलिकाधिकाराणां कृते सङ्घर्षरतः अस्ति, तर्हि वर्तमान-प्रतिनिधित्वस्य उत्तरदायित्वं निश्चयेन निर्धारणीयम्।

# मुख्यमन्त्रिणा कृतं भीम-बाँध-पर्यावरण-पर्यटन-क्षेत्रस्य (ईको-टूरिज्म) निरीक्षणम्; वनवासि-समाजस्य समस्याः श्रुत्वा समाधानार्थं प्रदत्ताः निर्देशाः







### मुद्गलपुर-मण्डले (मुंगेर) विकसन-कार्याणां समीक्षाम् अकरोत् मुख्यमन्त्री; वनवासि-बान्धवानाम् अभूतपूर्वः उत्साहः

*पाटलिपुत्रम् (बिहारम्), १० सितम्बर २०२६ : हिमसंस्कृतवार्ताः राघव नाथ झा*

बिहारस्य मुख्यमन्त्रिणा सम्राट-चौधरी-महोदयेन अद्य मुद्गलपुर-मण्डलस्य (मुंगेर) हवेली-खड़गपुर-प्रखण्डान्तर्गतस्य भीम-बाँध-पर्यावरण-पर्यटन-क्षेत्रस्य (ईको-टूरिज्म) सघनं भ्रमणं कृतम्। तत्र सञ्चालितानां विविध-विकास-परियोजनानां प्रगतिम् अवलोक्य तेन क्षेत्रस्य समुन्नयन-कार्याणां विस्तृत-समीक्षा विहिता। भ्रमणक्रमे मुख्यमन्त्री तत्र समवेतान् वनवासि-जनजाति-समाजस्य प्रतिनिधीन् अमिलत्, तेषां समस्याः गम्भीरतया अशृणोत्, तासां त्वरित-निवारणाय च सम्बद्ध-पदाधिकारिभ्यः दृढादेशान् अयच्छत्।

मुख्यमन्त्रिणं स्वमध्ये दृष्ट्वा वनवासि-बान्धवाः अतीव प्रमुदिताः सञ्जाताः, तैश्च 'सम्राट-चौधरी-दीर्घायुर्भव' इति जयघोषाः कृताः। मुख्यमन्त्री तैः सह आत्मीय-संवादं कुर्वन् तेषां दैनन्दिन-जीवनस्य कठिनाइः व्यजिज्ञासत्। वनवासि-समुदायस्य जनैः मुख्यतया सुदृढ-मार्गाणां, शुद्ध-पेयजलस्य, उच्च-विद्यालयानां, सेचनार्थं कुल्यानां (नहर), सामुदायिक-भवनानां च निर्माणार्थम् अभियाचना कृता। तान् आश्वसयन् मुख्यमन्त्री अवदत् यत् सर्वकारः वनवासि-समुदायस्य सर्वाङ्गीण-विकासाय, स्वावलम्बनाय, अधिकाराणां रक्षणाय च पूर्णतया प्रतिबद्धः अस्ति; क्षेत्रे आवश्यक-विकासकार्याणि शीघ्रमेव सम्पादयिष्यन्ते।

इदं कार्यक्रमं पर्यावरण-वन-जलवायु-परिवर्तन-विभागेन सम्यक् आयोजितम् आसीत्। अस्मिन् अवसरे मण्डलस्य प्रभारी तथा इक्षु-उद्योग-मन्त्री सञ्जय-कुमारः, पथ-निर्माण-मन्त्री कुमार-शैलेन्द्रः, सांसदः अरुण-भारती, विधायकः प्रणय-कुमारः, विधायकः मनीष-कुमारः, पूर्व-विधायकः राजीव-कुमार-सिंहः इत्यादयः जनप्रतिनिधयः उपस्थिताः आसन्। तथैव मुख्य-सचिवः प्रत्यय-अमृतः, पर्यावरण-विभागस्य अपर-मुख्य-सचिवः आनन्द-किशोरः, मुख्यमन्त्रिणः सचिवः सञ्जय-कुमार-सिंहः, मुद्गलपुरस्य प्रमण्डलायुक्तः प्रेम-सिंह-मीणा, आरक्षि-उपमहानिरीक्षकः (DIG) राकेश-कुमारः, मण्डलाधिकारी (जिलाधिकारी) निखिल-धनराज-निप्पाणीकरः, आरक्षि-अधीक्षकः (SP) सैयद-इमरान-मसूदः, अन्यान्य-वरिष्ठ-प्रशासकाः तथा च विपुल-संख्यायां वनवासि-समाजस्य नागरिकाः समागताः आसन्।

# दरभङ्गा-मण्डले उप-विकास-आयुक्तस्य अध्यक्षतायां सम्पन्ना मण्डलस्तरीय-अधिकोष-समीक्षा-सभा

**स्थानीयम् अर्थतन्त्रं, कृषिं, मखान्नोत्पादनम्, एफपीओ-संस्थाः, स्वरोजगारं, लघु-उद्यमांश्च अधिकोषीय-ऋणेन संयोजयितुं सांसदस्य डॉ. गोपाल-जी-ठाकुरस्य दृढनिर्देशः**




### प्रत्येकं दश-किलोमीटर-परिमित-दूरे राजकीय-अधिकोषस्य (शाखायाः) व्यवस्थापनाय भविष्यति प्रयासः

**दरभङ्गा (बिहारम्), १० सितम्बर २०२६ : हिमसंस्कृतवार्ताः राघव नाथ झा**

दरभङ्गा-समाहरणालय-परिसरे स्थिते बाबा-साहेब्-डॉ. भीमराव-अम्बेडकर-सभागारे मण्डलाधिकारिणः (जिलाधिकारी) कौशल-कुमारस्य निर्देशानुसारम् उप-विकास-आयुक्तस्य स्वप्निल-महोदयस्य अध्यक्षतायां सांसदस्य डॉ. गोपाल-जी-ठाकुरस्य च विशिष्टोपस्थितौ मण्डलस्तरीया परामर्शदात्री तथा अधिकोष-समीक्षा-सभा (बैंकिंग-रिव्यू) आयोजिता। सभायां मण्डलस्य अधिकोष-व्यवस्थायाः, ऋण-प्रवाहस्य, वित्तीय-समावेशनस्य, जनकल्याण-विषयाणां च सूक्ष्मेक्षिकया विस्तृत-समीक्षा कृता। अस्मिन् उपवेशने विशेषरूपेण कृषकाणां, मखानोत्पादकानां, स्वयंसहायता-समूहानां, कृषक-उत्पादक-सङ्घानां (FPO), लघु-उद्यमिनां, युव-उद्यमशीलतायाः, महिला-सशक्तीकरणस्य तथा च सर्वकार-प्रायोजित-योजनानां योग्यानां लाभार्थिनां कृते समयबद्धं, सुगमं, पारदर्शकं च अधिकोष-ऋणं प्रदातुं विशेषः बलो दत्तः।

### ऋण-प्रक्रियायां शैथिल्यं न सहेत सांसदः डॉ. गोपाल-जी-ठाकुरः

सभां सम्बोधयन् सांसदः डॉ. गोपाल-जी-ठाकुरः अवदत् यत् दरभङ्गायाः स्थानीयम् अर्थतन्त्रं सुदृढं विधातुं मखानम्, कृषि-आधारित-उद्योगान्, लघु-उद्यमांश्च अधिकोष-ऋणेन सह योजनम् अत्यावश्यकम् अस्ति। सः अधिकोष-पदाधिकारिभ्यः निर्देशम् अयच्छत् यत् योग्यानां लाभार्थिनाम् आवेदनानि विना कालक्षेपं त्वरितगत्या निष्पाद्येरन्, प्रक्रिया च सरला विधीयेत। सः डिजिटल-व्यवहारे साइबर-सुरक्षायाः विषयेऽपि जन-जागरूकता-प्रसाराणाय न्यवेदयत्। सांसेनेदमपि प्रतिपादितं यत् अधिकोषीय-क्षेत्रं केवलं धन-सञ्चये ऋण-दाने वा सीमितं न स्यात्, अपि तु इदं स्थानीय-रोजगारस्य, आत्मनिर्भरतायाः, 'विकसित-भारतस्य' च दृढम् आलम्बनं भवेत्। मण्डले सम्प्रति राजकीय-अधिकोषाणां २६४ शाखाः, २३५ स्वयंचलित-गणक-यन्त्राणि (ATM) तथा १,७५१ ग्राहक-सेवा-केन्द्राणि कार्यरतानि सन्ति। ग्रामीण-दूरातिदूर-क्षेत्रेषु प्रत्येकं दश-किलोमीटर-अन्तरे अधिकोष-शाखां समुपलब्धां कारयितुं स्थान-चिह्नीकरणस्य प्रक्रिया आरप्स्यते। सः अधिकोष-भूमि-सीमाङ्कनाय अतिक्रमण-मुक्ताय च प्रशासनिक-पहलस्य निर्देशं दत्तवान्।

केन्द्र-राज्य-योजनानां लाभः अन्तिम-पात्रं यावत् प्राप्यताम् समीक्षा-काले 'पीएम-किसान-सम्मान-निधिः', मखान-कृषकेभ्यः प्रदीयमाना वित्तीय-सहायता, 'पीएम-स्वनिधिः', 'मुद्रा-योजना' इत्याद्यानां दारिद्र्य-निवारक-योजनानां प्रगतिः विलोकिता।



## "संस्कृतकथामञ्जरी" {१६}

### ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

**"यज्ञलब्धफलदानं नाम दशमोपाख्यानम्"** (२)

राजाऽपि ग्रामाद्बहिर्वर्षमेकं ब्रह्मचर्य्येण मन्त्रं पठित्वा, दूर्वादलैर्दशांशं होममग्नौ कृत्वा यावत् पूर्णाहुतिं करोति, तावद्धोमकुण्डात् कश्चित् पुरुषो विनिर्गत्य दिव्यमेकं फलं राज्ञे ददौ। राजाऽपि तत् फलं गृहीत्वा पुरं प्रविश्य यदा राजमार्गे समायति, तदा कुष्ठव्याधिना विशीर्णावयवः कश्चिद् ब्राह्मणो राज्ञे आशिषं प्रयुज्याऽवदत्- भो राजन्! राजा नाम लोकस्य मातापित्रादिस्थाने नियोजितः। उक्तञ्च-

**"राजाबन्धुरबन्धूनां राजा चक्षुरचक्षुषाम्।**
**राजा माता पिता चैव सर्वस्यार्तिहरो गुरुः।।"**

यतः त्वं विश्वस्यार्त्तिं परिहरसि, अतः ममापि आर्त्तिं नाशय। अनेन व्याधिना मम शरीरं विनश्यति, शरीरनाशादनुष्ठानमपि नष्टं, यतः सर्वस्यापि धर्म्मकार्य्यस्य शरीरमेव साधनम्। तर्हि ममैतच्छरीरं निरामयम्, उपभोग्यञ्च यथा भवति तथा कर्तव्यम्। तद् ब्राह्मणवचनं श्रुत्वा, स राजा तस्मै तत् फलं ददौ। ततो ब्राह्मणः फलं भुङ्क्त्वा निरामयः दिव्यदेहश्च परं सन्तोषं प्राप्य निजस्थानं गतः। राजाऽपि स्वभवनमगमत्। इति कथयित्वा पुत्तलिकां भोजराजमवादीत्- भो राजन्! एवमौदार्य्यं धैर्य्यञ्च त्वयि चेत् विद्यते, तर्ह्यस्मिन् सिंहासने समुपविश। तच्छ्रुत्वा राजा तूष्णीमासीत्।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**

# प्रत्येक-मासस्य दशमे दिनाङ्के साक्षात्-लाभ-हस्तान्तरणेन (DBT) प्रेषयिष्यते सामाजिक-सुरक्षा-पेंशन-राशिः : मुख्यमन्त्री



- अगस्त-मासस्य वृत्तिरूपेण १,२३३.८७ कोटि-रूप्यकाणि १०५.६८ लक्ष-लाभार्थिनां वित्तकोष-लेखासु अन्तरितानि; ९८,८९६ नूतनाः लाभार्थिनः संयोजिताः
- मुद्गलपुर-जम्बुद्वीपयोः (मुंगेर-जमुई) मार्ग-विस्तारीकरणाय शिलान्यासः; आगामी-वर्षस्य सितम्बर-मासे भविष्यति उद्घाटनम्
- सार्ध-शतकोटि-रूप्यकाणां (₹१५० कोटि) व्ययेन मुद्गलपुर-जम्बुद्वीप-अरण्यक्षेत्रस्य भविष्यति समग्र-विकासः
- तारापुरे हवेली-खड़गपुरे च अस्मिन्नेव मासे प्रारप्स्यते न्यायालय-व्यवस्था
- 'फरक्का-जल-सन्धौ' बिहार-हित-संरक्षणार्थं क्रियिष्यते दृढः प्रयासः

**पाटलिपुत्रम् (बिहारम्), १० सितम्बर २०२६ : हिमसंस्कृतवार्ताः राघव नाथ झा**

बिहारस्य मुख्यमन्त्रिणा सम्राट-चौधरी-महोदयेन अद्य मुद्गलपुर-मण्डलस्य (मुंगेर) हवेली-खड़गपुर-प्रखण्डान्तर्गते गंगटा-सङ्गमस्थले समुपस्थाय दृश्य-श्रव्य-माध्यमेन (Video Conferencing) सामाजिक-सुरक्षा-पेंशन-योजनायाः अन्तर्गतम् अगस्त-मासस्य कृते राज्यस्य १०५.६८ लक्ष-लाभार्थिभ्यः प्रतिव्यक्ति एकादशशत-रूप्यकाणां (₹११००) मानेन आहत्य १,२३३.८७ कोटि-रूप्यकाणां विपुल-राशिः साक्षात्-लाभ-हस्तान्तरण-प्रणाल्या (डीबीटी) तेषां वित्तकोष-लेखासु प्रेषिता। अस्मिन् अवसरे ९८,८९६ नूतनाः लाभार्थिनः एतया कल्याणकारी-योजनया संयोजिताः। कार्यक्रमे मुख्यमन्त्रिणा राष्ट्रीय-राजमार्ग-३३३ इत्यस्य २८.३४० किलोमीटरात् (गंगटा) ३८.३४० किलोमीटर (कोहवरवा-सङ्गम) पर्यन्तं पथस्य विस्तारीकरण-दृढीकरण-परियोजनायाः शिलापट्ट-अनावरणं विधाय शिलान्यासः कृतः। नियत-समये वृत्ति-प्रदानं शासनस्य प्राथमिकता समारोहं सम्बोधयन् मुख्यमन्त्री अवदत् यत् सर्वकारः राज्यस्य प्रत्येकं पात्र-नागरिकाय बिना कञ्चित् पक्षपातं सामाजिक-सुरक्षां प्रदातुं दृढसङ्कल्पः अस्ति। लाभार्थिभ्यः समयबद्धतया राशिः प्रापणीया इत्यर्थं प्रत्येक-मासस्य दशमः (१०) दिनाङ्कः वृत्ति-प्रदानाय निश्चितः कृतः। सः स्पष्टमकरोत् यत् जाति-धर्म-आधारेण कोऽपि वञ्चितः न भविष्यति; योजनानां लाभः केवलं पत्रेषु न तिष्ठेत्, अपि तु साक्षात् निर्धनानां हस्तं गच्छेत्।

## जल-संसाधनानां कुशल-प्रबन्धनं फरक्का-सन्धिः च

मुख्यमन्त्रिणा प्रतिपादितं यत् बिहार-झारखण्डयोः पञ्चविंशति-वर्षेभ्यः प्रलम्बितः जल-विवादः केन्द्र-गृहमन्त्रिणः अमित-शाहस्य तथा राज्य-प्रशासनस्य साहाय्येन समाधानं प्रति गतः। सः बक्सरतः भागलपुरं यावत् गङ्गाजलस्य कुशल-नियमनाय बन्ध-निर्माणस्य आवश्यकतां प्राकटयत्। बाङ्ग्लादेशेन सह विहितायां जल-सन्धौ बिहारस्य हितानि सुरक्षितानि स्युः, वर्षपर्यन्तं च जलस्य उपयोगः भवेत् इति दृशा 'फरक्का-जल-सन्धौ' आवश्यक-प्रावधानानां समायोजनाय सर्वकारः दृढप्रयासं करिष्यति।

## शिक्षा-स्वास्थ्य-सुधार-योजनाः

राज्ये बालकेभ्यः उत्कृष्ट-शिक्षायै 'सरस्वती-विद्या-निकेतन-प्रतिदर्श-विद्यालयेषु' स्पर्धा-परीक्षाणां व्यवस्था, तथा 'बिहार-विद्यार्थी-साथी' इति तन्त्रांशेन (App) अहोरात्रं सहाय्यं दीयते। सः न्यवेदयत् यत् सितम्बर-मासस्य प्रथमात् दिनाङ्कात् नवम्बर-पर्यन्तं सार्ध-षट्-कोटि-जनेभ्यः निःशुल्कं स्वास्थ्य-परीक्षणाभियानं प्रचलति। १७ सितम्बर-दिनाङ्कात् शालासु स्वच्छतायै 'सेवा-सङ्कल्प-कायाकल्प-अभियानम्' आरप्स्यते।

## भीम-बाँध-पर्यावरण-पर्यटनस्य (ईको-टूरिज्म) वैश्विक-विकासः

मुख्यमन्त्रिणा उद्घोषितं यत् मुद्गलपुर-जम्बुद्वीपयोः अरण्यक्षेत्रस्य विकासाय १५० कोटि-रूप्यकाणां परियोजना प्रारब्धा। ऐतिहासिकस्य प्राकृतिकस्य च भीम-बाँध-प्रदेशस्य सौन्दर्यीकरणं कृत्वा अन्तर्राष्ट्रीय-स्तरीयाः पर्यटनानुशीलन-सुविधाः, वने पदयात्रा (Trekking), उपाहारगृहाणि च निर्मास्यन्ते, येन वैदेशिकाः पर्यटकाः अपि आकर्षिताः भवेयुः।

अस्मिन् मङ्गलावसरे कन्या-उत्थान-योजनायाः, जीविका-दीदी-सङ्घानां, सवर्ण-अन्तर्जातीय-विवाह-प्रोत्साहन-योजनायाश्च लाभार्थिभ्यः धनदेशपत्राणि (Cheques) तथा दिव्यांग-बन्धुभ्यः विद्युत्-चालित-त्रिचक्र-यानानां (Battery Tricycle) कुञ्चिकाः वितरिताः।

समारोहे इक्षु-उद्योग-मन्त्री सञ्जय-कुमारः, समाज-कल्याण-मन्त्री डॉ. श्वेता-गुप्ता, पथ-निर्माण-मन्त्री कुमार-शैलेन्द्रः, सांसदः अरुण-भारती, मुख्य-सचिवः प्रत्यय-अमृतः, आरक्षि-महानिदेशकः (DGP) विनय-कुमारः, अपर-मुख्य-सचिवः आनन्द-किशोरः, पथ-निर्माण-सचिवः पङ्कज-कुमार-पालः, समाज-कल्याण-सचिवः विनोद-सिंह-गुञ्जियालः, मुख्यमन्त्रिणः सचिवः सञ्जय-कुमार-सिंहः, प्रमण्डलायुक्तः प्रेम-सिंह-मीणा, आरक्षि-उपमहानिरीक्षकः राकेश-कुमारः, मण्डलाधिकारी निखिल-धनराज-निप्पाणीकरः, आरक्षि-अधीक्षकः सैयद-इमरान-मसूदः, प्रधान-मुख्य-वन-संरक्षकः अरविन्दर-सिंहः तथा सहस्रशः नागरिकाः समुपस्थिताः आसन्।

# मिश्रणकारिषु कठोरनियन्त्रणम्; खाद्य-सुरक्षायै सक्रियः स्वास्थ्य-विभागः

- *'फास्कोस' (FoSCoS) वातायनेन खाद्य-सुरक्षा-प्रक्रियायाः भविष्यति अङ्कीय-पर्यवेक्षणम् : श्रीकुमार-रविः*
- परीक्षणार्थं प्रयोगशालां प्रेषितानि प्रतिदर्शानि; दूषित-क्षीराम्ल-पिण्डैः (पनीर) सह विनष्टाः कालावधि-उत्तीर्णाः (एक्सपायर्ड) मिष्टान्न-राशयः

**पाटलिपुत्रम् (बिहारम्), १० सितम्बर २०२६ : हिमसंस्कृतवार्ताः राघव नाथ झा**

उत्सवावसरान् विलोक्य बिहारराज्ये खाद्यपदार्थानां गुणवत्तां विशुद्धतां च संरक्षितुं स्वास्थ्यविभागेन खाद्य-सुरक्षा-निरीक्षणस्य प्रवर्तन-प्रक्रियायाश्च सघनम् अभियानं तीव्रतरं कृतम्। जनसामान्येभ्यः निष्कण्टकं, गुणात्मकं, भेसज-मिश्रण-रहितं च खाद्यं समुपलब्धं कारयितुम् उद्दिश्य समग्रे राज्ये खाद्य-प्रतिष्ठानानाम् आकस्मिक-परीक्षणं विधीयते। निरीक्षणवेलायां संदूषितानि, विकृतानि, उपभोग-काल-उत्तीर्णानि (एक्सपायर्ड) च वस्तूनि विनाश्यन्ते; संशयितानां खाद्यद्रव्याणां प्रतिदर्शानि (नमूनानि) च संगृह्य वैज्ञानिक-परीक्षणाय खाद्य-प्रयोगशालासु प्रेष्यन्ते। स्वास्थ्य-सचिवः सह खाद्य-सुरक्षा-आयुक्तः श्रीकुमार-रविः न्यवेदयत् यत् आगस्त-मासस्य अन्तिम-सप्ताहात् समारब्धे अस्मिन् विशिष्टाभियाने सम्प्रति यावत् आहत्य ४१७ खाद्य-प्रतिदर्शानि संगृहीतानि। तेषु दुग्ध-दुग्धोत्पादानां १४९, खाद्य-तैलस्य १३, उपस्कराणां (मसाले) सौस-लेह्यस्य च ५६, मिष्टान्नानां ८८, वीथि-खाद्यानां (स्ट्रीट फूड) १८, पेयानां ३३, तथा धान्यानां द्विदल-धान्यानां च ६० प्रतिदर्शानि समन्वितानि सन्ति। एतानि सर्वाणि प्रतिदर्शानि वैज्ञानिक-परीक्षणार्थं राजकीय-प्रयोगशालासु सम्प्रेषितानि।

## विकृत-खाद्यसामग्रीणां विनाशः

विशिष्टाभियानस्य अन्तरे बहुषु स्थानेषु विकृत-खाद्यद्रव्याणां विरुद्धं दण्डात्मिका प्रक्रिया कृता। निरीक्षणकाले विकृताः पेड़ा-बर्फी-लड्डुक-पिष्टकादयः (केक) मिष्टान्नविशेषाः विनष्टाः। पाटलिपुत्रे रात्रौ अवशिष्टस्य पुनरुपयुक्तस्य तैलस्य निष्कासनम् अकारि। सर्वत्र खाद्य-अखाद्य-वस्तूनां पृथक्करणाय, पुरातन-पात्राणां परिशोधनाय, पेयजलनलिकानां स्वच्छतायै च दृढाः निर्देशाः प्रदत्ताः।

**उत्सवेभ्यः प्राक् मिष्टान्नेषु, दुग्धे, तैले, उपस्करेषु च तीक्ष्णा दृष्टिः**

आगामि-पर्व-दिनानि आलक्ष्य खाद्य-सुरक्षा-निरीक्षणं सुदृढीकृतम्। विशेषतः पयसः, तैलस्य, उपस्कराणां, सिद्ध-खाद्यानां च विशुद्धौ तीक्ष्णं ध्यानं दीयते। विहित-मानदण्डानाम् उल्लङ्घनकर्तृषु नियमानुसारेण कठोरं विधिकृत्यं सम्पाद्यते।

**'फीफो' (FIFO) तथा 'फेफो' (FEFO) पद्धतेः परिपालनम् अनिवार्यम्**

खाद्य-व्यापारिभ्यः द्रव्याणां भण्डारणे विक्रये च 'पूर्वं प्रविष्टं पूर्वं निर्गतम्' (FIFO) तथा 'पूर्वं कालोत्तीर्णं पूर्वं निष्कास्यम्' (FEFO) इति सिद्धान्तस्य परिपालनाय स्पष्टादेशः दत्तः। सर्वेषु प्रतिष्ठेषु 'एफ.एस.एस.ए.आई.' (FSSAI) अनुज्ञापत्रस्य प्राधान्येन प्रदर्शनम् अनिवार्यं कृतम्।



## खण्डस्तरीयस्य संस्कृतप्रतियोगितायाः भव्यसमापनम्

**हिमसंस्कृतवार्ताः - रघु वत्सः**

हरियाणा राज्यस्य फरीदाबादजनपदे राजकीय-माध्यमिक- विद्यालये, प्रह्लादपुरे (माजरा-डीग) संस्कृतसप्ताहस्य अन्तर्गतं आयोजितायाः खण्डस्तरीय- संस्कृतप्रतियोगितायाः भव्यं समापनम् अभवत्। प्रतियोगितायाः आयोजनं संस्कृतायामस्य सौजन्येन स्वर्गीय- डॉ. रुद्रदत्तशास्त्रिणः स्मृतौ कृतम्। प्रतियोगितायां खण्डस्य विभिन्नविद्यालयेभ्यः षष्ठीकक्षातः अष्टमीकक्षापर्यन्तं छात्राः छात्राश्च उत्साहपूर्वकं भागं गृहीतवन्तः। श्लोकोच्चारणेन, गीतिकया, लघुनाटिकया तथा भाषणेन च ते संस्कृतभाषायां स्वप्रतिभां प्रदर्शितवन्तः। कार्यक्रमस्य संयोजकः सेवानिवृत्तः प्रवक्ता इन्द्रसैनशास्त्री आसीत्, कार्यक्रमस्य अध्यक्षता च सेवानिवृत्ता प्रवक्त्री गीतार्या अकरोत्। मुख्यातिथिरूपेण स्वर्गीय- डॉ. रुद्रदत्तशास्त्रिणः धर्मपत्नी वीनूशर्मा उपस्थिताऽभवत्। अस्मिन् अवसरे सुशीलयादवशास्त्री, महेन्द्रशर्माशास्त्री, प्रो. जोरावरसिंहशास्त्री (नेहरूमहाविद्यालयः), राकेशशास्त्री, पुरुषोत्तमशास्त्री इत्यादयः अनेकाः संस्कृतविद्वांसः विशेषरूपेण उपस्थिताः आसन्। प्रतियोगितायां भागीरथशास्त्री, सुन्दरभडाना, मोहनशास्त्री, देवराजशास्त्री, वीरेन्द्रलाम्बा, रेखागोहली तथा सुषमाराणी निर्णायकमण्डलस्य सदस्यरूपेण छात्राणां छात्राणां च प्रतिभायाः मूल्याङ्कनम् अकुर्वन्। श्लोकोच्चारणे प्रियांशी प्रथमस्थानं, रुचिका द्वितीयस्थानं तथा दिव्या तृतीयस्थानं प्राप्तवती। गीतिका-प्रतियोगितायां सुहाना प्रथमस्थानं, तनिष्का द्वितीयस्थानं तथा हेमा तृतीयस्थानं प्राप्तवत्यः। लघुनाटिका-संवादे हर्षिता, आकांक्षा, अंकिता तथा हितांशी प्रथमस्थानं प्राप्तवत्यः। सुमनः, तानिषः तथा रुचिका द्वितीयस्थानं प्राप्तवन्तः। प्राची तथा संध्या तृतीयस्थानं प्राप्तवत्यौ। भाषणप्रतियोगितायां सुमनः प्रथमस्थानं, कञ्चन द्वितीयस्थानं तथा श्वेता तृतीयस्थानं प्राप्तवत्यः। सर्वेभ्यः प्रतिभागिभ्यः प्रोत्साहनपुरस्कारान् प्रदाय तेषाम् उत्साहवर्धनं कृतम्। कार्यक्रमस्य मंचसञ्चालनं संस्कृतायामस्य जिलामहामन्त्री सोमदत्तशास्त्री अकरोत्। सः संस्कृतभाषायाः महत्त्वं तथा समाजे तस्याः उचितस्थानं विषये उपस्थितजनसमूहम् अवगतवान्। विद्यालयस्य मुख्याध्यापकः रविकान्तगुप्तः सर्वेषां विद्वदतिथीनां तथा विभिन्नविद्यालयेभ्यः आगतानां छात्राणां छात्राणां च चन्दनतिलकेन स्वागतं कृतवान्। प्रतियोगितायां स्थानं प्राप्तवद्भ्यः विद्यार्थिभ्यः अतिथिभिः प्रशस्तिपत्राणि, पदकानि तथा स्मृतिचिह्नानि प्रदाय सम्मानिताः कृताः। प्रतियोगितायाः संयोजकः इन्द्रसैनशास्त्री संस्कृतभाषां आधुनिकयुगस्य आवश्यकता इति प्रतिपाद्य तां संस्काराणां भाषाम् अवदत्। अस्मिन् अवसरे संस्कृतायामस्य जिलाध्यक्षः रघुशास्त्री, प्राचार्यः जितेन्द्रकुमारः, मुख्याध्यापकः समरदेशवालः, ओमपालशास्त्री, धर्मवीरशर्मा, राकेशकुमारः इत्यादयः अनेकाः शिक्षकाः गणमान्यजनाश्च उपस्थिताः आसन्।



## विद्यावाचस्पति- प्राध्यापक- स्वानन्द- गजाननपुण्ड- महोदयाय महाकवि- कालिदास- संस्कृतसाधना- पुरस्कारस्य घोषणा

**हिमसंस्कृतवार्ताः- जगदीश डाभी (महाराष्ट्रम्)**

"गीर्वाणवाणी" इत्यस्य उपक्रमस्य माध्यमेन यथार्थरूपेण "विश्वगुरुत्वं" प्राप्तानां, लोकमान्य तिलकमहाविद्यालयः वणी इत्यत्र संस्कृतविभागप्रमुखानां, संतगाडगेबाबा- अमरावती- विश्वविद्यालयस्य संस्कृतपाठ्यक्रम- मण्डलनियामकस्य विद्यावाचस्पति- प्राध्यापक- स्वानन्द- गजाननपुण्डमहोदयानां महाराष्ट्रशासनस्य उच्च-तन्त्रशिक्षणविभागेन घोषितः "महाराष्ट्रराज्य- महाकविकालिदास- संस्कृतसाधना- पुरस्कारः" तावत् तेभ्यः यावत्पर्यन्तं विश्वतः प्राप्यमाणायां लोकमान्यतायां राजमान्यतायाः राजमुद्रा एव अस्ति। ९६ ग्रन्थाः, ३०ई पुस्तकानि, ६ पुस्तकानां सम्पादनम्, ६००० वृत्तपत्रेषु लेखाः,५००० व्याख्यानप्रवचनानि, त्रिंशत्तः अधिकैः मान्यवरसंस्थाभिः प्रदत्ताः पुरस्काराः, लिम्का- बुक- ऑफ-रेकॉर्ड, नेशनल-बुक-ऑफ-रेकॉर्ड, इण्टरनॅशनल- बुक- ऑफ- रेकॉर्ड, इण्डिया- बुक- ऑफ- रेकॉर्ड, लन्दन-बुक-ऑफ-रेकॉर्ड इत्येतासु विक्रमपुस्तिकायाम् पञ्चभिः विभिन्नैः उपक्रमैः कृता विक्रमः एषः विस्मयकारिणः कार्यस्य एतद् महान् सम्मानः अस्ति। 'गीर्वाणवाणी' यूट्यूब-वाहिन्याः माध्यमेन नीतिशतकम्, मेघदूतम्, अभिज्ञानशाकुन्तलम्, स्वप्नवासवदत्तम, वेदान्तसारः, भारतीयस्वयंशिक्षापद्धतिः, रसास्वादोऽन्योक्तीनाम् इत्यादयः विभिन्ननिरूपणमालिकाः प्रसरन्ति, याभिः सहस्रशः संस्कृतप्रेमिणः लाभान्विताः भवन्ति। राष्ट्रीयशैक्षणिकसंसाधनस्वयं-इत्यस्य अनुसरणेन तैः एषु विषयेषु निर्मिताः सर्वे ऑनलाईन- निःशुल्क-अ भ्यासक्रमाः विश्वतः सहस्रशः संस्कृतप्रेमिणां प्रचुरं प्रतिसादं प्राप्नुवन्ति। 'दैनिकहिन्दूस्थान' पत्रे नित्यं प्रकाश्यमाना तेषां रघुवंशमहाकाव्यस्य लेखमाला लन्दन- बुक- ऑफ- रेकॉर्ड इत्यनेन स्वीकृता अस्ति, शीघ्रमेव एषा मालिका नूतनं विक्रमं स्थापयिष्यति। महाराष्ट्रशासनेन प्रदत्तः अयं सम्मानः सर्वेषां संस्कृतप्रेमिणां कृते सार्थाभिमानस्य विषयः अस्ति। हिमवार्ता- परिवारस्य पक्षतः डॉ. स्वानंद- गजाननपुण्डमहोदयस्य हार्दिकं अभिनन्दनम्!

# पद्मश्री पद्मा सचदेव राजकीय- महिला- महाविद्यालये, गांधीनगरम्, जम्मू इत्यत्र

## एकवर्षीय- संस्कृतप्रमाणपत्रीय- पाठ्यक्रमस्य शुभारम्भः सम्भाषणशिविरस्य च समापनसमारोहः





**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, जम्मू)** पद्मश्री पद्मा सचदेव- राजकीय- महिला- महाविद्यालये, गांधीनगरम्, इत्यत्र संस्कृतभाषायाः प्रचार-प्रसाराय, दैनन्दिनजीवने तस्याः प्रयोगं वर्धयितुमायोजितस्य दशदिवसीय- सरल- संस्कृत- सम्भाषणशिविरस्य समापनसमारोहः उत्साहपूर्णे गरिमामये च वातावरणे सम्पन्नः। समारोहस्य प्रारम्भः दीपप्रज्ज्वालनेन मातुः सरस्वत्याः पूजनेन च अभवत्। रिया एवं बिन्दू इत्याभ्यां मङ्गलाचरणं प्रस्तुतम्। कार्यक्रमस्य अध्यक्षता महाविद्यालयस्य प्राचार्या प्रो. कुलविदंरकौरमहोदया कृता। उद्बोधने सा संस्कृतभाषायाः महत्त्वं प्रतिपादयन्ती छात्रान् संस्कृतभाषां केवलं पाठ्यविषयरूपेण न स्वीकृत्य दैनन्दिनजीवने व्यवहारस्य च अङ्गरूपेण प्रयोजयितुं प्रेरितवती। कार्यक्रमे केन्द्राध्यक्षः एवं संस्कृतविभागाध्यक्ष डॉ. विजेन्द्रकुमार- शर्मणेन संस्कृतभाषायाः अधिकाधिकप्रयोगाय प्रेरिताः। तेन प्रतिपादितं यत् संस्कृतभाषायाः जनजनं प्रति प्रसाराय तस्याः प्रयोगः केवलं शैक्षणिकक्षेत्रे एव सीमितः न भवेत्, अपि तु सामान्यजीवने सम्भाषणभाषारूपेण अपि संस्कृतस्य प्रयोगः करणीयः। समारोहस्य मध्ये संस्कृतगीतं शिल्पादेवी एवञ्च श्रुति इत्याभ्यां प्रस्तुतम्। शिविरसम्बद्धमनुभवं पलकशर्मा एवञ्च दीक्षा इत्याभ्यां प्रस्तुतम्। दियाशर्मा, रजनी, प्रियंका इत्येताभिः अपि शिविरस्य विभिन्नासु गतिविधिषु उत्साहपूर्वकं सक्रियतया च सहभागिता कृता। शिविरे केन्द्रशिक्षकः इति दायित्वेन श्रीप्रवेशकुमार-शुक्लः छात्रेभ्यः सरलस्य व्यावहारिकस्य च संस्कृतसम्भाषणस्य प्रशिक्षणं प्रदत्तम्। विविधाभिः गतिविधिभिः संवादात्मकाभ्यासैश्च छात्रेषु संस्कृतभाषायाः प्रति अनुरागः, आत्मविश्वासः सम्भाषणक्षमता च विकसिताः। अवसरेऽस्मिन् मुख्यवक्तृरूपेण संस्कृतभारत्याः संगठनमन्त्रिणः श्रीऋषिकुमारमिश्रमहोदयस्य गरिमामयी उपस्थितिः आसीत्। तेन संस्कृतभाषायाः संरक्षणाय, संवर्धनाय, प्रचार-प्रसाराय च सम्भाषणशिविराणां महत्त्वं विशदीकृतम्। छात्राः संस्कृतभाषायाः अधिकाधिकप्रयोगं कर्तुं तेन प्रेरिताः। समारोहे महाविद्यालयस्य विभिन्नविभागानां अध्यक्षाः प्राध्यापकाः च उपस्थिताः आसन्। तेषु पंजाबी विभगाध्यक्षा डॉ. अनुराधा, डोगरीविभागाध्यक्षः डॉ. तरसेम, उर्दूविभागाध्यक्षः डॉ. लियाकत, हिन्दीविभागाध्यक्षा डॉ. बिन्दुचिब, मनोविज्ञानविभागाध्यक्षा डॉ. शबीला प्रमुखरूपेण उपस्थिताः आसन्।

तदतिरिक्तं संस्कृत विभागस्य प्राध्यापक डॉ. नबीताजम्वाल एवञ्च डॉ. आशाशर्मा इत्येतयोः सहितं महाविद्यालयस्य छात्राः अपि कार्यक्रमे हर्षेण उत्साहेन च सहभागितां कृतवन्तः। दशदिवसीय- शिविरस्यास्यावधौ छात्रेभ्यः दैनन्दिनजीवनसम्बद्धेषु विविधेषु विषयेषु संस्कृतेन संवादः, स्वपरिचयः, प्रश्नोत्तराभ्यासः तथा व्यावहारिकसम्भाषणस्य प्रशिक्षणं च प्रदत्तम्। अस्य शिविरस्य माध्यमेन छात्रेषु संस्कृतभाषायाः प्रति रुचिः, सम्भाषणे आत्मविश्वासः तथा संस्कृतेन वक्तुं क्षमता च वर्धिता। समापनसमारोहस्य अन्ते डॉ. वर्चस कामशर्मणः सर्वेभ्यः प्रतिभागिभ्यः, शिक्षकेभ्यः आयोजकेभ्यश्च कृतज्ञता व्यक्ता। सम्पूर्णः कार्यक्रमः संस्कृतभाषां सरलां सहजां जनसामान्यस्य च व्यवहारभाषां कर्तुं दिशि सार्थकः प्रेरणादायकश्च प्रयासः सिद्धः।

# लनामिवि-दरभङ्गायाः रासेयो-प्रकोष्ठेन बिहार-राज्य-आपदा-प्रबन्धन-प्राधिकरणस्य तत्त्वावधाने आयोजितम् आपदा-प्रबन्धन-प्रशिक्षणं तृतीये दिवसेऽपि प्रवृत्तम्



### 'तिष्ठ, शयस्व, लोलस्व' सिद्धान्तेन शरीरस्थस्य वह्नेः तथा 'अवनमस्व, आच्छादय, गृहाण' सिद्धान्तेन भूकम्पप्रभावस्य शमनं सम्भवम् — एसडीआरएफ-दलम्

**दरभंगा हिमसंस्कृतवार्ताः राघव नाथ झा**

ललितनारायणमिथिलाविश्वविद्यालयस्य (दरभङ्गा) राष्ट्रीयसेवाप्रयोजना-प्रकोष्ठेन बिहारराज्य- आपदा-प्रबन्धन-प्राधिकरणस्य (पाटलिपुत्रम्) सौजन्येन विश्वविद्यालयपरिसरस्थे जुबिली- सभागारे प्रचलन् दरभङ्गामण्डलस्य विभिन्नमहाविद्यालयेभ्यः समागतानां द्विशतं (२००) रासेयो-स्वयंसेवकानां "युवा आपदा-मित्र-सप्तदिवसीय-आवासीय-प्रशिक्षणशिविरम्" अद्य तृतीये दिवसेऽपि सोत्साहं सञ्चालितम्। अद्यतनप्रशिक्षणस्य शुभारम्भः राष्ट्रगीतेन रासेयो-लक्ष्यगीतेन च, समापनं च राष्ट्रगानेन अभवत्। प्रशिक्षणे राज्य-आपदा-प्रतिवादन-बलस्य (एसडीआरएफ) पक्षतः रूपेशकुमारपासवानः, पङ्कजकुमारः, राजुकुमारः, सन्तोषकुमारः, मालिककुमारः, पूजाकुमारी, प्रीतुकुमारी, मिथिलेशतिवारी च सहभागिनः आसन्। शिविरसंयोजकः डॉ. आर. एन. चौरसिया, डॉ. रीताकुमारी, डॉ. शबनमकुमारी, डॉ. सोनूरामशङ्करः, डॉ. सुनीताकुमारी, डॉ. योगेश्वरसाहः, मणिकान्तठाकुरः, मुकेशकुमारझा, सुमितकुमारः, रवीन्द्रकुमारसिंहः, वैभवझा, अङ्किताकुमारी, विकासकुमारः, सञ्जयकुमारमहतो इत्यादयः सक्रियं सहयोगमकुर्वन्।

प्रथमसत्रे प्रशिक्षकेण पङ्कजकुमारेण सीपीआर (CPR) इत्यस्य स्वरूपं, तस्य प्रयोजनं, दानविधिं, तत्कृते लाभांश्च विस्तरेण विवृण्वता प्रतिपादितं यत् हृदयं मानवशरीरस्य सर्वाधिकं महत्त्वपूर्णमङ्गं वर्तते, यस्य स्पन्दनविरामे सति मानवस्य प्राणात्ययः भवति। यदि आकस्मिकतया हृदयस्पन्दनं रुध्येत तर्हि सीपीआर-माध्यमेन तत् पुनः सञ्चालयितुं शक्यते। धूमपानसेवनेन, उच्चरक्तचापेन, उच्चकोलेस्ट्रॉल-कारणेन, मानसिकतनावशारीरिकश्रमाभ्यां, मेदोरोगेण, प्रमेहेण, अतिश्रमेण च हृदयाघातस्य सम्भावना संवर्धते। सः अवदत् यत् सीपीआर एका आपत्कालीनप्राथमिकोपचारप्रक्रिया वर्तते या जीवन-मरणयोः सङ्कटापन्नायां स्थितौ दीयते। तदनन्तरसत्रे प्रशिक्षकेण व्रणितस्य/आहतस्य जनस्य सुरक्षितेन विधिना अन्यत्र नयनस्य उपायाः प्रदर्शिताः। अपि च गृहोपकरणैः एव 'स्ट्रेचर' निर्माणस्य विधिः शिक्षिता, येनापत्काले जनं रुग्णवाहनं वा चिकित्सालयं प्रति सावधानतया प्रापयितुं शक्येत।प्रशिक्षिका प्रीतुकुमारी कायिकपरीक्षणेन स्वास्थ्यावबोधनस्य विविधान् उपायान् सविस्तरं निरूपयन्ती मानवकलेवरे स्थितानामस्थ्नां सङ्ख्यां, तेषां कार्याणि, क्षतीश्च स्पष्टीचकार। सा अवदत् यत् अस्थीनि अङ्गानि संरक्षन्ति, रक्तकोशिकानां निर्माणे साहाय्यं कुर्वन्ति, देहाय च निर्दिष्टमाकारं प्रयच्छन्ति। अस्थिस्थैर्याय च तया उचितम् आहार-विहारम्, क्रीडा-व्यायामौ, जीवनशैल्याश्च व्यावहारिकनियमाः बोधिताः।

# डी. पी. एस. वाराणस्यां पूर्व ISRO अध्यक्षस्य श्री ए. एस. किरणकुमारस्य प्रेरणादायी संवादः



## वैज्ञानिकदृष्टिः, जिज्ञासा, नवाचारः तथा 'Success Mindset' इत्येतैः विद्यार्थिनां प्रेरणम्

**हिमसंस्कृतवार्ताः- वाराणसी।** दिल्ली-पब्लिक- स्कूल- वाराणसीपरिसरे ९- १० सितम्बर २०२६ दिनाङ्कयोः भारतस्य प्रख्याते अन्तरिक्षवैज्ञानिकेन, भारतीय- अन्तरिक्ष- अनुसन्धान- सङ्घटनस्य (ISRO) पूर्वाध्यक्षेन तथा भारतसर्वकारस्य अन्तरिक्षविभागस्य पूर्वसचिवेन श्री ए. एस. किरणकुमारेण सह विद्यार्थिनां कृते द्विदिवसीयः प्रेरणादायी संवादात्मकः कार्यक्रमः आयोजितः। कार्यक्रमस्य प्रमुखोद्देश्यं विद्यार्थिषु वैज्ञानिकदृष्टिकोणस्य, जिज्ञासायाः, सृजनात्मकतायाः, नवाचारस्य, समस्यासमाधान-कौशलस्य तथा राष्ट्रनिर्माणस्य प्रति उत्तरदायित्वभावनायाः विकासः आसीत्।

### कार्यक्रमस्य शुभारम्भः

किरणकुमारवर्यस्य विद्यालयागमने NCC कैडेट-दलेन गार्ड ऑफ ऑनर इति सम्मानः प्रदत्तः। विद्यालयस्य निदेशकः सिद्धार्थ राजगढ़ियावर्य तस्य स्वागतं कृत्वा विद्यालयस्य स्मृतिचिह्नेन तं सम्मानितवान्। कार्यक्रमस्य विशिष्टातिथिः श्री विनित गोयनका, प्रखरः टेक्नोक्रेट, शिक्षाविद्, लेखकः, विचारकः, अपि विद्यालयपरिवारस्य पक्षतः सम्मानितः। अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्या मुनमुन सेनगुप्ता, एकेडमिक-हेड् रोली मानखण्ड, विद्यालयस्य लर्निंग-लीडर्स उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः शङ्खनादेन दीपप्रज्वलनेन च अभवत्।

### किरणकुमारस्य वैज्ञानिकयात्रा

विद्यार्थिभ्यः किरणकुमारवर्यस्य वैज्ञानिकजीवनस्य उपलब्धीनां च परिचयः प्रदत्तः। सः ISRO संस्थायां चत्वारिंशदधिकवर्षपर्यन्तं सेवां कृतवान् तथा २०१५ तः २०१८ पर्यन्तं ISRO संस्थायाः अध्यक्षः, अन्तरिक्षविभागस्य च सचिवः आसीत्। चन्द्रयान-१, मङ्गलयान, INSAT-3D, Cartosat, Resourcesat, NavIC इत्यादिषु महत्त्वपूर्णेषु अन्तरिक्ष-अभियानेषु च तस्य उल्लेखनीयं योगदानम् आसीत्। चन्द्रयान- १-अभियाने तेन विकसितैः उपकरणैः चन्द्रस्य पृष्ठभागे जल-अणूनाम् अन्वेषणे महत्त्वपूर्णं योगदानं प्राप्तम्। भारतीय-अन्तरिक्ष-अभियानानां कृते तेन पञ्चाशदधिकाः इलेक्ट्रो-ऑप्टिकल इमेजिङ्ग सेन्सर अपि विकसिताः।

## जिज्ञासायाः वैज्ञानिक-दृष्टिकोणस्य च महत्त्वम्

स्वसम्बोधने किरणकुमारमहोदयः विद्यार्थिभ्यः अवदत् यत् महती उपलब्धिः लघुप्रश्नेन जिज्ञासया च आरभते। उपग्रह-प्रौद्योगिक्याः माध्यमेन मौसमपूर्वानुमानं, समुद्रसुरक्षा, सञ्चारः, आपदाप्रबन्धनं, प्राकृतिकसंसाधनानां संरक्षणम् इत्यादिषु क्षेत्रेषु विज्ञानस्य महत्त्वपूर्णा भूमिका अस्ति।प्राकृतिकापदां मौसमपरिवर्तनानां च पूर्वसूचनया सम्भावितानि संकटानि न्यूनीकर्तुं बहुमूल्यानां जीवनानां रक्षणं च शक्यते इति सः स्पष्टं कृतवान्।सः विद्यार्थिभ्यः प्रश्नं पृच्छितुं, स्वतन्त्रतया चिन्तयितुं, अवलोकनं कर्तुं तथा प्रयोगशीलाः भवितुं प्रेरितवान्। प्रकृतेः सूक्ष्मनिरीक्षणेन मानवेन रडार, सोनार, उन्नत-कैमरा इत्यादीनां प्रौद्योगिकीनां विकासः कृतः इति उलूकस्य चमगादडस्य च उदाहरणैः सः स्पष्टं कृतवान्।

### "कक्षा एव भवतः Launchpad अस्ति"

द्वितीयदिने किरणकुमारवर्यः विद्यार्थिभ्यः प्रेरणादायकं वाक्यम् उक्तवान्- "कक्षा एव भवतः Launchpad अस्ति।"
सः स्पष्टं कृतवान् यत् शिक्षायाः उद्देश्यं केवलं परीक्षासज्जता नास्ति। शिक्षा विद्यार्थिषु सार्थकप्रश्नानां पृच्छा, स्वतन्त्रचिन्तनम्, समस्यासमाधान- कौशलं समाजस्य प्रति उत्तरदायित्वभावना विकसितुं सहायिका भवेत्।

### भारतस्य अन्तरिक्षयात्रा

किरणकुमारवर्यः भारतस्य अन्तरिक्षकार्यक्रमस्य विकासयात्रां विद्यार्थिभिः सह साझां कृतवान्। डॉ. विक्रमसाराभाई-महोदयस्य दूरदर्शिनः नेतृत्वे भारतस्य अन्तरिक्ष-अनुसन्धानस्य आधारः स्थापितः। १९६३ तमे वर्षे थुम्बा-स्थानात् प्रथमः साउण्डिङ्ग-रॉकेट प्रक्षेपितः।सीमितसंसाधनानाम् अभावेऽपि भारतं वैज्ञानिकजिज्ञासया, आत्मनिर्भरतया, निरन्तरप्रयत्नेन च अन्तरिक्षविज्ञानस्य क्षेत्रे उल्लेखनीयां प्रगतिं प्राप्तवान्। उपग्रह-प्रौद्योगिकी सञ्चारस्य, शिक्षायाः, मौसमस्य, कृषेः, जलसंसाधनस्य, आपदाप्रबन्धनस्य च क्षेत्रेषु जनकल्याणाय प्रयुज्यते।

### चन्द्रयान-३, मङ्गलयान तथा NISAR

भारतस्य अन्तरिक्षक्षेत्रस्य उपलब्धीनां वर्णनं कुर्वन् किरणकुमारवर्यः मङ्गलयान तथा चन्द्रयान-अभियानानां विशेषतः उल्लेखं कृतवान्। चन्द्रयान- २ अभियानात् प्राप्तां शिक्षां आत्मसात् कृत्वा चन्द्रयान-३ २३ अगस्त २०२३ दिनाङ्के चन्द्रस्य दक्षिणध्रुवीयक्षेत्रे सफलं soft landing कृत्वा ऐतिहासिकम् उपलब्धिं प्राप्तवान्। तथैव NISAR (NASA-ISRO Synthetic Aperture Radar) इत्यस्य सफलं प्रक्षेपणं भारतस्य तकनीकीक्षमतायाः अन्तर्राष्ट्रीय-सहयोगस्य च महत्त्वपूर्णम् उदाहरणम् इति कार्यक्रमे प्रतिपादितम्।

### असफलता—सफलतायाः सोपानम्

किरणकुमारवर्यस्य सम्बोधने असफलतायाः प्रति सकारात्मकदृष्टिकोणः विशेषरूपेण प्रकाशिता आसीत्। तेन विद्यार्थिभ्यः सन्देशः दत्तः यत् असफलता अन्तिमं लक्ष्यं न, अपि तु शिक्षणस्य आत्मसुधारस्य च अवसरः अस्ति।
सः विद्यार्थिभ्यः समस्याणां मूलकारणं ज्ञातुं, समाधानस्य अन्वेषणं कर्तुं तथा स्वकौशलस्य निरन्तरं विकासं कर्तुं प्रेरितवान्। "समस्यां ज्ञात्वा, समाधानम् अन्विष्य, स्वकौशलं निरन्तरं वर्धयत" इति सफलता-मनोवृत्तेः मूलसन्देशः विद्यार्थिषु विशेषं प्रभावं जनितवान्।

### २०४७ तमवर्षस्य भारतस्य संकल्पः

कार्यक्रमे श्रीकिरणकुमारः विद्यार्थिभ्यः प्रश्नं पृष्टवान्- "२०४७ तमे वर्षे भारतं विश्वे कस्मिन् स्थाने भवेत्?" सः विद्यार्थिभ्यः स्वकीयां पूर्णक्षमतां ज्ञात्वा ज्ञानस्य, कौशलस्य, परिश्रमस्य तथा प्रतिबद्धतायाः माध्यमेन विकसितस्य अग्रणीभारतस्य निर्माणे योगदानं दातुं प्रेरणां दत्तवान्। तस्य मतानुसारं लक्ष्यप्राप्तेः मार्गे विलम्बः अथवा असफलता जीवनस्य अन्तः न, अपि तु नवीनदिशायाः आरम्भः भवितुम् अर्हति।

### विद्यालयस्य दृष्टिकोणः

विद्यालयस्य प्रधानाचार्या मुनमुन सेनगुप्ता अवदत् यत् डी. पी. एस. वाराणसी विद्यार्थिनः एकविंशतितमस्य शताब्दस्य आवश्यकतानुसारं सज्जीकर्तुं प्रतिबद्धः अस्ति।



विद्यालयस्य उद्देश्यं विज्ञान-प्रौद्योगिक्योः दक्षतया सह मानवीयमूल्यानां, 'Success Mindset' तथा 'Service Before Self' इति सेवाभावनायाः विकासः अपि अस्ति।

विद्यालयस्य निदेशकः सिद्धार्थराजगढ़ियावर्यः विद्यार्थिभ्यः जिज्ञासया, सृजनात्मकतया तथा 'Success Mindset' इत्यनेन सह नवीनसम्भावनानाम् अन्वेषणाय प्रेरितवान्। सः प्रतिपादितवान् यत् ज्ञानस्य सह चरित्रम्, विज्ञानस्य सह संवेदनशीलता तथा स्वप्नानां सह साहसम् विद्यार्थिनः सक्षमाः उत्तरदायिनश्च वैश्विकनागरिकाः निर्मास्यन्ति।

## ज्ञानवर्धकः प्रश्नोत्तर-संवादः

कार्यक्रमस्य प्रश्नोत्तरसत्रं विशेषरूपेण उल्लेखनीयम् आसीत्। विद्यार्थिभिः उपग्रहाः, मौसमपूर्वानुमानम्, अन्तरिक्षप्रौद्योगिकी, कॅमेरायाः तरङ्गदैर्घ्यम् तथा उच्च-संकल्पचित्रणम् इत्यादीनां विषयाणां सम्बन्धे प्रश्नाः पृष्टाः। किरणकुमारवर्यः तेषां जिज्ञासानां सरलतया वैज्ञानिकरीत्या च समाधानं कृतवान्।

**उपसंहारः-**

द्विदिवसीयः अयं कार्यक्रमः विद्यार्थिनां कृते ज्ञानवर्धकः, प्रेरणादायकः, भविष्यदृष्ट्या महत्त्वपूर्णः अनुभवः अभवत्। संवादेन विद्यार्थिषु वैज्ञानिकजिज्ञासा, नवाचारः, आत्मविश्वासः तथा राष्ट्रस्य भविष्यस्य प्रति उत्तरदायित्वभावना सुदृढा अभवत्। कार्यक्रमस्य समापनसमये किरणशर्मा, समर्पणविङ्गस्य लर्निंग-लीडर, धन्यवादज्ञापनं कृतवती। कार्यक्रमस्य सञ्चालनं शांभवी झा तथा श्रेया प्रसाद इत्याभ्यां कृतम्। अस्मिन् अवसरे विद्यालयस्य पदाधिकारिणः, शिक्षकगणाः तथा विद्यार्थिनः उपस्थिताः आसन्

# महाकवि-कालिदास-संस्कृत-साधना-पुरस्काराः उद्घोषिताः संस्कृत-सेवायै समर्पिताः ३४ विद्वांसः महाराष्ट्र-शासनेन समादृताः



**हिमसंस्कृतवार्ता — मुम्बई।**

महाराष्ट्र-शासनेन संस्कृत-क्षेत्रे अतुलनीय-योगदान-प्रदातृभ्यः विद्वद्भ्यः विविधासु श्रेणीषु दीयमानाः 'महाकवि-कालिदास-संस्कृत-साधना-पुरस्काराः' उद्घोषिताः। २०२१ तः २०२५ पर्यन्तं पञ्चानां वर्षाणां पुरस्काराः शासनेन प्रकाशिताः। महाराष्ट्रस्य संस्कृत-विदुषां समादराय राज्य-शासनेन अस्याः पुरस्कार-योजनायाः सञ्चालनं विधीयते। शासकीय-नियमानुसारेण पुरस्कार-चयन-प्रक्रिया सम्पादिता।

महाकवि-कालिदास-संस्कृत-साधना-पुरस्कार-चयन-समित्याः अध्यक्षाः माननीयाः उच्च-तथा-तन्त्रशिक्षा-मन्त्रिणः श्रीचन्द्रकान्तदादा-पाटील-महोदयाः आसन्, यत्रैव अन्वीक्षण-समित्याः अध्यक्षाः कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य कुलपतयः डॉ. अतुल-वैद्य-महोदयाः आसन्। उभयोः समित्योः सदस्य-सचिव-रूपेण संस्कृत-विभागाध्यक्षः डॉ. पराग-जोशी कार्यम् अकरोत्।

चयन-समित्याः उपवेशनं सम्पन्नायाम् अस्यां प्रक्रियायां पञ्चानां वर्षाणां कृते आहत्य ३४ विद्वांसः अस्य पुरस्कारस्य कृते चयनिताः, येषु अन्य-राज्यानां पञ्च विद्वांसः अपि समाविष्टाः सन्ति। जीवनपर्यन्तं संस्कृत-सेवायाम् अनुरतानाम् एतेषां विदुषां राज्य-स्तरे गौरव-सम्माननं विधास्यते। पुरस्कार-स्वरूपेण प्रत्येकस्मै विदुषे २५,००० रूप्यकाणां नकद-राशिः, उत्तरीयम् (शाल), श्रीफलं, प्रशस्ति-पत्रं च प्रदास्यते।

### कविकुलगुरु-कालिदास-संस्कृत -विश्वविद्यालयाय द्विगुणितः गौरवः

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य संस्कृत-संस्कृतेतर-सङ्कायस्य अधिष्ठात्री प्रो. कविता-होले (नागपुरम्, २०२४) 'संस्कृत-प्राध्यापक-संवर्गे' तथा च अन्य-राज्य-संस्कृत-पण्डित-संवर्गे विश्वविद्यालयस्य पूर्व-कुलपतयः, प्रख्याताः न्यायशास्त्र-विद्वांसः, साम्प्रतं केन्द्रीय-संस्कृत-विश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. श्रीनिवास-हनुमन्त-वरखेडी-महोदयाः कालिदास-संस्कृत-साधना-पुरस्कारार्थं चयनिताः।

पुरस्कृत-विदुषां श्रेणीवार-नामावली

### १. प्राचीन-संस्कृत-पण्डिताः:

श्रीस्वामी कृष्णचैतन्यपुरी, जालना (२०२१)
श्रीचन्द्रशेखरमहाराज-देगलूरकरः, परभणी (२०२२)
श्रीवेदशास्त्रसम्पन्न-दत्तात्रेय-भानुदासदेव-पोहेकरः, छत्रपति-सम्भाजीनगरम् (२०२३)

### २. वेदमूर्तयः

श्रीमाधव-व्यङ्कटेश-पराञ्जपे, पुणे (२०२१)
श्रीउमेश-अनन्त-महाराज-टाकळीकरः, परभणी (२०२३)
पण्डित-डॉ. अशोक-नरहरराव-देवः, छत्रपति-सम्भाजीनगरम् (२०२४)
श्रीकृष्ण-मधुकर-पळसकरः, परभणी (२०२५)

### ३. संस्कृत-शिक्षकाः अन्ये च:

श्रीमती वैशाली-नायकवडे-चव्हाण, इचलकरञ्जी (२०२१).डॉ. अरुणा-सीतारामराव-शामराजः, छत्रपति-सम्भाजीनगरम् (२०२१)
श्रीसचिन-अरुण-मुळे, नाशिकम् (२०२२)
श्रीमती माधुरी-अभय-कुलकर्णी, कराड (२०२३)
श्रीमती सङ्गीता-गजानन-आम्भारे, नाशिकम् (२०२३). श्रीमती श्वेता-श्रीकान्त-पवनीकरः, नागपुरम् (२०२४). श्रीरघुवीर-रवीन्द्र-रामदासी, साङ्गली (२०२५). श्रीज्ञानेश्वर-विठ्ठल-कुलकर्णी, अलिबाग (२०२५)

### ४.संस्कृत-प्राध्यापकाः तत्सम-अध्यापकाश्चः

डॉ. स्मिता-सुधीर-होटे, नागपुरम् (२०२१)
प्रा. स्वानन्द-गजानन-पुण्ड, वणी (२०२१)
डॉ. माधुरी-चन्द्रकान्त-कलकोटे, पुसद (२०२२)
डॉ. गणञ्जय-यज्ञेश्वरराव-कहाळेकरः, नान्देड (२०२२). डॉ. दिनेश-पाण्डुरङ्ग-रसाळः, पुणे (२०२३). प्रो. डॉ. कविता-सुनील-होले, नागपुरम् (२०२४). डॉ. पङ्कजा-माधव-वाघमारे, छत्रपति-सम्भाजीनगरम् (२०२४).डॉ. शुचिता-लालचन्द-दलालः, नागपुरम् (२०२५). डॉ. ऋजुता-रुचिर-गोडबोले-पाण्डे, नागपुरम् (२०२५)

### ५. संस्कृत-कार्यकर्तारः:

डॉ. चन्द्रगुप्त-श्रीधर-वर्णेकरः, नागपुरम् (२०२१)
डॉ. चन्द्रशेखर-वझे, मुम्बई (२०२२)
डॉ. दिगम्बर-नागनाथराव-मुडेगावकरः, अम्बाजोगाई (२०२३). श्रीमती मीना-शरद-पागे, नागपुरम् (२०२४). श्रीमती माधवी-भास्कर-कोल्हटकरः, पुणे (२०२५)

### ६. अन्य-राज्यानां संस्कृत-पण्डिताः:

डॉ. वसन्तकुमार-भट्टः, कर्णावती (अहमदाबाद), गुजरातम् (२०२१). डॉ. पी. सी. मुरलीमाधवनः, त्रिचूर, केरलम् (२०२२). प्रो. ललितकुमार-पटेलः, वेरावल, गुजरातम् (२०२३). प्रो. श्रीनिवास-वरखेडी, बेङ्गळूरु, कर्नाटकम् (२०२४)
प्रो. रमाकान्त-पाण्डेयः, हरिद्वारम्, उत्तराखण्डम् (२०२५)





# कुशोत्पाटिनीपर्वणः प्रासङ्गिकता (पर्वविशेषः)

- डॉ विमलेश झा,
रमेशकुंज, गंगौली,
सरिसबपाही, मधुबनी, बिहार

भारतीयसंस्कृतिः सनातनपरम्परायाः, आध्यात्मिकचिन्तनस्य, प्रकृतिप्रेम्णः, लोकमङ्गलभावनायाश्च अद्भुतं समन्वयरूपम् अस्ति। अस्याः संस्कृतेः प्रत्येकं पर्व, प्रत्येकं संस्कारः, प्रत्येकं धार्मिकानुष्ठानं च कस्यचित् गम्भीरस्य तत्त्वस्य प्रतिपादकं भवति। भारतीयजीवनपद्धतौ वनस्पतीनां, नदीनां, पर्वतानां, पशूनां, पक्षिणां च प्रति श्रद्धाभावः प्राचीनकालादेव दृश्यते। याः वनस्पतयः धार्मिककर्मसु प्रयुज्यन्ते, तासां महत्त्वं तु विशेषतया वर्धते। तादृशेषु पवित्रवनस्पतिषु कुशस्य स्थानम् अत्यन्तं महत्त्वपूर्णम् अस्ति।

कुशः अथवा दर्भः वैदिकसंस्कृतौ पवित्रतमेषु तृणेषु परिगण्यते। यज्ञे, होमे, संध्योपासने, तर्पणे, श्राद्धकर्मणि, पूजायां तथा विविधेषु संस्कारेषु कुशस्य प्रयोगः भवति। भाद्रपदमासस्य कृष्णपक्षे अमावास्यायां कुशोत्पाटनस्य विशेषपरम्परा दृश्यते। अस्याः तिथेः सम्बन्धः कुशस्य धार्मिकोपयोगेन सह अस्ति। अतः एषा तिथिः सामान्यतया 'कुशोत्पाटिनी अमावास्या' इति नाम्ना प्रसिद्धा अस्ति। कुशोत्पाटिनी केवलं तृणस्य उन्मूलनस्य अथवा संग्रहस्य दिवसः नास्ति, अपितु भारतीयजीवनदृष्टेः, प्रकृतिसम्मानस्य, धार्मिकपवित्रतायाः, पर्यावरणचेतनायाश्च प्रतीकरूपेण अपि अस्याः महत्त्वं स्वीक्रियते। आधुनिके युगेऽपि अस्याः परम्परायाः प्रासङ्गिकता अत्यन्तं वर्तते। कुशः भारतीयपरम्परायां पवित्रः तृणविशेषः अस्ति। संस्कृते 'कुशः', 'दर्भः', 'पवित्रम्' इत्यादिभिः नामभिः निर्दिश्यते। वैदिककर्मकाण्डे कुशस्य उपयोगः बहुविधः अस्ति। यज्ञकर्मणि ऋत्विजः कुशैः वेदिं परिष्कुर्वन्ति, आसनं निर्मान्ति, पवित्रं धारयन्ति च। तर्पणादिकर्मणि अपि कुशस्य प्रयोगः आवश्यकः मन्यते। कुशस्य महत्त्वं केवलं धार्मिकप्रयोगे न सीमितम् अस्ति। अस्य तृणस्य दृढता, सरलता, उपयोगिता च भारतीयमनीषिभिः अवश्यं दृष्टा। भूमौ वर्धमानः अयं तृणविशेषः अनेकप्रकारेण मानवजीवनस्य सहायकः भवति। अतः कुशः भारतीयसंस्कृतेः प्रकृतिसम्बद्धजीवनस्य उत्तमं उदाहरणम् अस्ति। वेदेषु यज्ञस्य महत्त्वं विशेषतया प्रतिपादितम् अस्ति। यज्ञः केवलं देवपूजायाः साधनं न, अपि तु सामूहिककल्याणस्य, पर्यावरणशुद्धेः, आत्मसंयमस्य च प्रतीकः अस्ति। यज्ञीयकर्मणि प्रयुज्यमानाः पदार्थाः शुद्धाः पवित्राः च भवन्ति। कुशस्य तत्र विशेषं स्थानम् अस्ति।

वैदिकपरम्परायां कुशः पवित्रतायाः प्रतीकः मन्यते। कुशस्य प्रयोगः कर्मकाण्डस्य बाह्यभागः इव दृश्यते, किन्तु तस्य अन्तर्निहितः सन्देशः आन्तरिकशुद्धेः अस्ति। कुशोत्पाटिन्यां नूतनकुशानां संग्रहः भवति। धार्मिककर्मणि वर्षपर्यन्तं प्रयोजनीयाः कुशाः अस्मिन् समये संगृह्यन्ते। भाद्रपदस्य कृष्णपक्षस्य अमावास्यां तिथौ कुशोत्पाटनस्य दृष्ट्या महत्त्वपूर्णा मन्यते। अस्यां तिथौ शुद्धस्थानेभ्यः कुशाः विधिपूर्वकं गृह्यन्ते। परम्परानुसारं कुशोत्पाटनसमये शौचं, पवित्रता, श्रद्धा तथा उचितविधिः पालनीया भवति। कुशस्य संग्रहः यथासम्भवं मूलसहितः अथवा आवश्यकतायाः अनुरूपं भवेत्। कुशानां प्रति अनादरः न करणीयः, यतः भारतीयपरम्परायां प्रकृतेः प्रत्येकं अंशं प्रति सम्मानभावः अपेक्षितः अस्ति।अस्याः तिथेः प्रमुखम् उद्देश्यं धार्मिककर्मणां कृते शुद्धकुशानां संग्रहः अस्ति। अतः गृहस्थाः, धार्मिकाः, पुरोहिताः तथा वैदिकपरम्परानुसारिणः जनाः अस्याः तिथेः महत्त्वं स्वीकुर्वन्ति।

भारतीयधर्मपरम्परायां बाह्यशुद्धेः अपेक्षया अन्तःकरणशुद्धेः महत्त्वं अधिकम् अस्ति। कुशोत्पाटनं साधकाय अस्यैव सत्यस्य स्मरणं कारयति। यथा कुशः भूमौ दृढतया स्थित्वा विविधेषु धार्मिककर्मसु उपयोगी भवति, तथैव मनुष्येण अपि स्वजीवने धैर्यं, संयमः, सत्यनिष्ठा च धारणीया। कुशस्य तीक्ष्णता मनुष्यस्य विवेकस्य प्रतीकत्वेन अपि व्याख्यातुं शक्यते। विवेकः मोहस्य अज्ञानस्य च छेदनं करोति। यथा तीक्ष्णः कुशः सावधानतया प्रयोक्तव्यः, तथैव जीवनस्य मार्गे मनुष्येण विवेकपूर्वकं व्यवहारः करणीयः। कुशोत्पाटिनीतिथिः अस्मान् स्मारयति यत् धार्मिकजीवनं केवलं कर्मकाण्डपर्यन्तं सीमितं न भवेत्। धार्मिककर्मणः मूलं श्रद्धा, शुद्धिः, संयमः, परोपकारः, प्रकृतिप्रेम च भवितुमर्हति। आधुनिककाले पर्यावरणप्रदूषणं, वनविनाशः, जलसङ्कटं, भूमिक्षयः, जैवविविधतायाः ह्रासः च वैश्विकसमस्याः अभवन्। एतादृशे समये भारतीयपरम्परायाः प्रकृतिप्रेमपूर्णः दृष्टिकोणः अत्यन्तं उपयोगी भवति। कुशोत्पाटिनी पर्वणः माध्यमेन जनाः वनस्पतीनां महत्त्वं स्मर्तुं शक्नुवन्ति। कुशः सामान्यतृणवत् दृश्यते, किन्तु धार्मिकदृष्ट्या तस्य महत्त्वं असाधारणम् अस्ति। अनेन ज्ञायते यत् भारतीयमनीषिणः प्रकृतेः सामान्यतमेषु अंशेषु महत्त्वं दृष्टवन्तः। अस्माभिः कुशस्य संग्रहकाले प्रकृतिसन्तुलननियमः अवश्यमेव पालनीयः। आवश्यकतामनुसृत्य तृणसंग्रहः करणीयः। पर्यावरणसंरक्षणस्य आधुनिकसन्देशेन सह एषा भावना योजयितुं शक्यते। कुशोत्पाटिनीपर्व अस्मभ्यं शिक्षयति- 'प्रकृतिः केवलं उपभोगस्य वस्तुर्नास्ति, अपितु पूजनीयः जीवनाधारः अस्ति।' एषा भावना यदि जनजीवने विकसिता भवेत् तर्हि पर्यावरणसंरक्षणस्य कार्ये महती सहायता भवेत्। प्राचीनभारतीयपरम्परायां धार्मिकानुष्ठानैः सह व्यवहारिकजीवनस्य अपि समन्वयः दृश्यते। कुशस्य उपयोगः केवलं धार्मिकविश्वासस्य परिणामः न, अपि तु तस्य भौतिकगुणानां कारणेन अपि अस्य उपयोगिता स्वीकर्तुं शक्यते। कुशः कठोरः, दीर्घजीवी च तृणविशेषः वर्तते। ग्राम्यजीवने विभिन्नेषु कार्येषु तृणानां उपयोगः प्राचीनकालादेव भवति। धार्मिककर्मणि विशेषवनस्पतीनां उपयोगः जनानां मध्ये तासां संरक्षणस्य भावनां जनयति। यस्य वनस्पतेः धार्मिकमहत्त्वं भवति, तस्य संरक्षणे समाजस्य स्वाभाविकः उत्साहः भवति। अतः कुशोत्पाटिनी परम्परा एकप्रकारेण वनस्पतिज्ञानस्य लोकपरम्परायाः च संगमं प्रदर्शयति। आधुनिकविज्ञानस्य प्रकाशे अस्याः परम्परायाः पुनर्मूल्याङ्कनं करणीयम्।

भारतीयसंस्कृतेः विशिष्टता तस्याः निरन्तरता अस्ति। सहस्राब्देभ्यः पुरातनाः अनेकाः परम्पराः अद्यापि जनजीवने प्रचलिताः सन्ति। कुशोत्पाटिनी तादृशी एव परम्परा अस्ति। परम्पराः केवलं अतीतस्य स्मृतयः न भवन्ति। ताः वर्तमानजीवनस्य मूल्यानि अपि निर्मान्ति। कुशोत्पाटिन्याः माध्यमेन बालाः युवानश्च वैदिकपरम्परायाः विषये ज्ञातुं शक्नुवन्ति। तेषां मनसि भारतीयसंस्कृतिसम्बद्धः गौरवभावः उत्पद्यते। विद्यालयेषु अपि कुशोत्पाटिन्याः अवसरं सांस्कृतिक- शैक्षिक-कार्यक्रमरूपेण उपयोक्तुं शक्यते। छात्रेभ्यः कुशस्य धार्मिकमहत्त्वं, पर्यावरणीयोपयोगिता, संस्कृतसाहित्ये तस्य उल्लेखः च सरलतया बोधयितुं शक्यते। अनेन भारतीयज्ञानपरम्परायाः आधुनिकशिक्षया सह समन्वयः भवति।

भारतीयपर्वाणि सामाजिकैकतायाः साधनानि अपि भवन्ति। एकत्र मिलित्वा धार्मिककर्मणि भागं गृह्णन्तः जनाः परस्परं सहयोगं, सौहार्दं, आत्मीयतां च वर्धयन्ति। कुशोत्पाटिनी पर्वणि कुटुम्बस्य सदस्याः एकत्रिताः भवन्ति। ज्येष्ठाः कनिष्ठेभ्यः परम्परायाः ज्ञानं ददति। एवं ज्ञानस्य एकस्याः सन्ततेः अपरां सन्ततिं प्रति संक्रमणं भवति। कुशस्य उपयोगः भारतीयधार्मिकजीवने बहुविधः अस्ति। संध्योपासनायां, तर्पणे, श्राद्धे, होमे, यज्ञे, पूजायां च कुशस्य प्रयोगः भवति। कुशैः आसनं निर्मीयते। पवित्ररूपेण कुशस्य धारणमपि क्रियते। विशेषतः पितृकर्मणि कुशस्य महत्त्वं अधिकं दृश्यते। तर्पणकर्मणि कुशस्य प्रयोगः परम्परया स्वीकृतः अस्ति। देवकर्म, पितृकर्म चोभयत्रापि कुशस्य उपयोगः तस्य व्यापकधार्मिकमहत्त्वं सूचयति। अतः कुशोत्पाटिनी तिथौ संगृहीताः कुशाः वर्षस्य विविधेषु धार्मिककार्येषु प्रयुज्यन्ते। एतेन एकस्य पर्वणः सम्बन्धः वर्षपर्यन्तस्य धार्मिकजीवनेन भवति।

कुशोत्पाटनसमये मनुष्येण श्रद्धा, शुचिता, संयमः च धारणीया। प्रकृतेः पदार्थान् गृह्णन् मानवः कृतज्ञताभावं प्रकटयेत्। 'मम उपयोगाय प्रकृतिः अस्ति' इति भावनायाः स्थाने 'अहं प्रकृतेः अंशः अस्मि' इति भावना भवेत्।

एषः विचारः आधुनिकपर्यावरणशास्त्रे अपि अत्यन्तं महत्त्वपूर्णः अस्ति। मनुष्यः प्रकृतेः स्वामी न, अपितु तस्याः एकं अङ्गम् अस्ति। अतः प्रकृतिसम्पदां विवेकपूर्णः उपयोगः करणीयः।

भारतीयपर्वपरम्परासु नारीणां भूमिका महत्त्वपूर्णा अस्ति। गृहस्य धार्मिकपरम्पराणां संरक्षणे मातरः, कन्याः, भगिन्यः च महत्त्वपूर्णं योगदानं ददति। कुशोत्पाटिनीसम्बद्धाः आचाराः अपि कुटुम्बस्य माध्यमेन बालानां मनसि प्रतिष्ठापिताः भवन्ति।

माता बालकाय कथां कथयति, पिता धार्मिकविधिं बोधयति, ज्येष्ठाः परम्परायाः कारणानि स्पष्टयन्ति। एवं सम्पूर्णं कुटुम्बं संस्कृतिसंरक्षणस्य केन्द्रं भवति।

आधुनिकता मानवजीवनं अत्यन्तं परिवर्तितवती अस्ति। विज्ञानप्रगतेः कारणेन मानवस्य जीवनं सुखकरं जातम्, किन्तु प्रकृतेः अधिकशोषणेन अनेकाः समस्याः अपि उत्पन्नाः अभवन्। जलवायुपरिवर्तनम्, वायुप्रदूषणम्, जलप्रदूषणम्, भूमिस्खलनं, वननाशः च मानवसभ्यतायाः सम्मुखे महत् आव्हानम् अस्ति।

एतादृशे काले कुशोत्पाटिनी इव पर्वपरम्परा अस्मान् प्रकृत्या सह पुनः सम्बद्धं कर्तुं शक्नोति। यदि धार्मिकपर्वाणि पर्यावरणसंरक्षणेन सह वयं योजयेम, तर्हि तेषां सामाजिकोपयोगिता महत्त्वपूर्णा भवेत्। कुशोत्पाटिनीदिने जनाः वृक्षारोपणं, तृणवनस्पतिसंरक्षणं, जलसंरक्षणं, स्वच्छताकार्यक्रमं च आयोजयितुं शक्नुवन्ति। विद्यालयेषु छात्राः कुशस्य प्रतिरूपं, चित्रं, संस्कृतसाहित्ये तस्य उल्लेखं च अध्ययनविषयरूपेण स्वीकर्तुं शक्नुवन्ति।

नूतनसन्ततिः यदि परम्पराणां कारणं न जानाति, तर्हि सा शनैः शनैः ताभ्यः दूरं गमिष्यति। अतः युवानां कृते केवलं 'इदं कुरुत' इति कथनं पर्याप्तं नास्ति। 'किमर्थं कुरुत' इति अपि स्पष्टतया बोधयितव्यम्। कुशोत्पाटिन्याः माध्यमेन छात्रेभ्यः संस्कृतभाषायाः, वेदस्य, यज्ञपरम्परायाः, पर्यावरणस्य तथा भारतीयसंस्कृतेः परस्परसम्बन्धः बोधयितुं शक्यते। युवानः यदि परम्पराणां वैज्ञानिकं, सांस्कृतिकं, आध्यात्मिकं च पक्षं ज्ञास्यन्ति, तर्हि ते अन्धविश्वासात् मुक्ताः भूत्वा विवेकपूर्णरीत्या संस्कृतिसंरक्षणं कर्तुं शक्नुवन्ति।

भारतीयज्ञानपरम्परा केवलं ग्रन्थेषु निहिता नास्ति। सा जनजीवने, आचारव्यवहारे, उत्सवेषु, संस्कारेषु, कृषिपरम्परासु, औषधीयवनस्पतिषु च निहिता अस्ति। कुशोत्पाटिनी तस्याः जीवन्तपरम्परायाः एकम् उदाहरणम् अस्ति। कुशस्य माध्यमेन धर्मः, प्रकृतिः, समाजः, विज्ञानं, संस्कृतिः च परस्परं सम्बध्यन्ते। एषः समन्वयः भारतीयदृष्टेः विशेषता अस्ति। आधुनिककाले अनेकाः पारम्परिकवनस्पतयः जनजीवनात् शनैः विलुप्तप्रायाः भवन्ति। अतः कुशस्य संरक्षणमपि आवश्यकम् अस्ति। धार्मिकप्रयोगाय कुशं संगृह्णतां जनानां मध्ये तस्य संवर्धनस्य भावना भवेत्। कुशस्य अधिकसंग्रहः न करणीयः। यत्र कुशः स्वाभाविकतया वर्धते, तत्र तस्य पुनर्विकासस्य अवसरः दातव्यः। आवश्यकतायाः अनुरूपं संग्रहणं, संरक्षणं, संवर्धनं च करणीयम्।अद्य पर्यावरणसंकटस्य समये कुशोत्पाटिन्याः महत्त्वं नूतनदृष्ट्या अवलोकनीयम् अस्ति। एतत् पर्व केवलं धार्मिककर्मकाण्डस्य अवसरः न भूत्वा प्रकृतिसंरक्षणस्य, वनस्पतिसम्मानस्य, वैदिकसंस्कृतिसंरक्षणस्य, भाविसन्ततीनां च संस्कारनिर्माणस्य अवसरः भवितुम् अर्हति।

अतः कुशोत्पाटिनी केवलं परम्परा न, अपि तु प्रकृत्या सह मानवस्य आत्मीयसम्बन्धस्य पावनं स्मरणम् अस्ति। अन्ते च-

**कुशाग्रे वसते रुद्रः कुशमध्ये तु केशव।**
**कुशमूले वसेद् ब्रह्मा कुशान्मे देहि मेदिनि!**
**कुशोऽसि कुशपुत्रोऽसि ब्रह्मणा निर्मितं पुरा।**
**देवपितृहितार्थाय कुशमुत्पाटयाम्यहम्।।**

इत्यलम्।।



# वैदिकज्योतिषे भावयोगदशानां सार्थकताः प्रत्यक्षप्रमाणं फलितस्य च शास्त्रीयाधारः

## अष्टादशमहर्षिपरम्परया संपुष्टस्य भावविज्ञानस्य नाभसयोगानां च समन्वयेनैव यथार्थफलकथनं सम्भवम्

- आचार्यः हिरेन्द्रशुक्लः ज्योतिष-वास्तुशास्त्र-विशेषज्ञः, बैतूल (मध्यप्रदेशः)

ज्योतिषशास्त्रमनादिकालादेव मानवजिज्ञासायाः, गवेषणायाः, दार्शनिकचिन्तनस्य च प्रधानं केन्द्रं वर्तते। व्युत्पत्तिदृष्ट्या विविच्यमाने सति 'ज्योतिषां सूर्यादिग्रहाणां बोधकं शास्त्रम्' इति व्युत्पत्त्या ज्ञायते यत् सूर्य-चन्द्र-ग्रहनक्षत्राणां गति-स्थिति- प्रभावानां प्रत्यक्षबोधकं शास्त्रमेव ज्योतिषम् अस्ति। प्रत्यक्षसाक्षिस्वरूपौ प्रत्यक्षदेवौ सूर्यचन्द्रमसौ अस्य शास्त्रस्य प्रमाणभूतौ स्तः। एतेषां खगोलीयपिण्डानां प्रत्यक्षदर्शनेन प्रभावेण च अस्य प्राकृतशास्त्रस्य 'ज्योतिषम्' इति नाम्ना प्रसिद्धिर्जाता। अस्य गूढविज्ञानस्य प्रवर्तकाः मुख्याः अष्टादश महर्षयः सन्ति- सूर्यः, पितामहः (ब्रह्मा), व्यासः, वसिष्ठः, अत्रिः, पराशरः, कश्यपः, नारदः, गर्गः, मरीचिः, मनुः, अङ्गिराः, लोमशः, पौलिशः, च्यवनः, यवनः, भृगुः, शौनकश्च। एतैः महर्षिभिः मानवजीवनस्य सूक्ष्मातिसूक्ष्मपक्षाणाम् उद्घाटनाय भाव-योग-दशानां सुदृढः सिद्धान्तः प्रतिष्ठापितः।

### द्वादशभावाः मानवजीवनस्य समग्रं दर्पणम्

फलकथनप्रक्रियायां भावज्योतिषस्य महती उपादेयता विद्यते। जन्माङ्गस्य द्वादशभावाः मानवस्य समग्रं जीवनवृत्तं प्रकाशयन्ति-

**प्रथमभावः (लग्नभावः):** शरीरसौष्ठवम्, वर्णः, बलाबलम्, स्वभावः, सुखदुःखयोश्च समग्रं ज्ञानम्।

**द्वितीयभावः (धनभावः):** धनधान्यम्, पैतृकसम्पत्तिः, कुटुम्बः, वाक्चातुर्यम्, धातु-रत्नानि, मारकत्वञ्च।

**तृतीयभावः (सहजभावः):** पराक्रमः, सहोदराः, भृत्याः, उपदेशः, लघुयात्राः, पुरुषार्थश्च।

चतुर्थभावः (सुखभावः): माता, भूमिः, भवनम्, वाहनम्, कृषिः, आन्तरिकमानसिकशान्तिश्च।

**पंचमभावः (सुतभावः):** विद्या, बुद्धिः, मन्त्रसाधना, विवेकः, सन्ततिः, पूर्वजन्मकृतानि पुण्यानि च।

**षष्ठभावः (रिपुभावः):** रोगाः, ऋणम्, शत्रवः, मातुलपक्षः, जीवनसङ्घर्षश्च।

**सप्तमभावः (जायाभावः):** जीवनसङ्गिनी (पतिः वा), साझेदारी, वाणिज्यम्, लोकव्यवहारः, दूरप्रवासश्च।

**अष्टमभावः (आयुर्भावः):** आयुः, सङ्कटम्, गूढविद्याः, अनुसन्धानम्, पूर्वजन्मसंस्काराश्च।

**नवमभावः (धर्मभावः):** भाग्यम्, धर्मः, गुरुसेवा, उच्चविद्या, तीर्थाटनम्, आध्यात्मिकसमुन्नतिश्च।

**दशमभावः (कर्मभावः):** आजीविका, प्रशासनिकप्रतिष्ठा, राजसम्मानः, पदम्, पितृसुखञ्च।

**एकादशभावः (आयभावः):** आर्थिकलाभः, अभीष्टसिद्धिः, मित्रवर्गः, ज्येष्ठभ्राता च।

**द्वादशभावः (व्ययभावः):** व्ययः, दानम्, बन्धनम्/रुग्णालयवासः, विदेशगमनम्, मोक्षश्च।

योगदशाक्रमयोः समन्वयः: फलितस्य गतिशीलता केवलं भावानां स्थित्या फलकथनं पूर्णं न भवति; ग्रहाणां स्थानबलस्य, दृष्टेः, योगानां च समन्वयः नितान्तमपेक्षितः। फलकथने 'नाभसयोगानाम्' अतिमहत्त्वपूर्णं स्थानमस्ति, येषां द्वात्रिंशत् (३२) प्रमुखाः भेदाः, प्रायः अष्टादशशतम् (१८००) प्रभेदाश्च प्रतिपादिताः सन्ति। एषु ३ आश्रययोगाः, २ दलयोगौ, २० आकृतियोगाः, ७ सांख्ययोगाश्च अन्तर्भवन्ति। यदा लग्ने शुभग्रहाणां संस्थितिर्भवति, तदा शुभयोगेन जातकः गुणवान्, वाक्पटुः, यशस्वी च भवति; विपरीते तु अशुभयोगप्रभावेन चरित्रे प्रतिष्ठायां च आघातः सम्भवति।

अनेन सह दशा-महादशानां क्रमः कालनिर्धारणे प्रधानं कारणं भवति। लग्नेशस्य दशायां यशः आरोग्यञ्च सिध्यति; धनेश-सप्तमेशयोः दशा मारकप्रभावाय कल्पते। तृतीयेश- षष्ठेश- अष्टमेशानां दशा सङ्घर्षं व्याधिञ्च उत्पादयति; चतुर्थेश- पञ्चमेश- नवमेश- दशमेशानां दशासु पद- प्रतिष्ठा- सम्पत्ति-भाग्योदयानां प्राप्तिर्भवति। एकादशेशस्य दशा लाभेन सह व्याधिभयं जनयति, द्वादशेशस्य दशायां च व्ययबाहुल्यं मानसिकोद्वेगश्च जायते। वस्तुतः भाव-योग-दशानां त्रिवेणीसङ्गमेन एव फलितज्योतिषे प्रामाणिकं फलोपधायकञ्च सिध्यति।